Vol. XIX No. I

# Bulletin of The Government Oriental Manuscripts Library Madras

EDITED

by

R. K. PARTHASARATHI, M.A., L.T.,
DIP. in FRENCH AND GERMAN,

*Curator, Government Oriental Manuscripts Library, Madras.*

©

Government of Tamil Nadu

1969

*Price* : *Rs.* 2.

# RARE BOOKS AT REDUCED RATES

The following invaluable publications of the Government Oriental Manuscripts Library, Triplicane, Madras-5, will be sold for the amount noted against each, *which represents only half the original price* :—

Packing and postage are extra and the entire amount should be sent *in advance.*

Please apply to the Curator for your requirements.

| | | Rs. | P. |
|---|---|---|---|
| 1. | Rāmānujacampū with commentary ... | 1 | 50 |
| 2. | Vyākaraṇa Mahābhāṣya of Patañjali with the commentary of Kaiyaṭa and the super-commentary of Annambhaṭṭa : Volume I ... | 10 | 37 |
| 3. | Back Volumes of the multi-lingual, half-yearly Bulletin containing in print rare manuscripts in Sanskrit, Tamil, Malayalam, Telugu, Kannada, Marathi and Islamic Languages (each Volume comprising 2 issues) published in or before 1950. ... | 2 | 00 |

4. The Descriptive and Triennial Catalogues of the Manuscripts in the Library published in or before 1950 are also available for sale *at half the original rate.*

*A trade-discount of 6¼% will be allowed to all bona-fide book-sellers within India, against the purchase of the Bulletin.*

*As for our other publications, a discount of* 25% *will be allowed to all bona-fide book-sellers.*

Vol. XIX

No. I

# Bulletin of The Government Oriental Manuscripts Library Madras

EDITED

by

R. K. PARTHASARATHI, M.A., L.T.,
DIP. in FRENCH AND GERMAN,
*Curator, Government Oriental Manuscripts Library, Madras.*

©
Government of Tamil Nadu

1969

*Price :* *Rs.* 2.

Printed at
RATHNAM PRESS,
11 Badrian Street, Madras-1.

# Table of Contents

PAGE

1. ADHIKĀRASAṄGRAHADĪPIKĀ
—SAVYĀKHYĀ ... 1-6; 1—52

*Edited by Thiru R. K. Parthasarathi,* M.A., L.T.
*and Thiru T. A. K. Venkatachariar, Śirōmaṇi.*

2. SIDDHĀNTASĀRĀVALIḤ-SAVYĀKHYĀ ... 53—84

*Edited by Thiru R. K. Parthasarathi,* M.A., L.T.
*and Thiru T. H. Viswanathan, Śirōmaṇi.*

3. THIRUVAḶḶUVAR PIḶḶAI-T-TAMIZH ... 33—51

*Edited by Thiru R. K. Parthasarathi,* M.A., L.T.
*and Thiru P. Subramaniam, Vidvān.*

4. VĪRABHŪPĀLĪYAMU ... i-x; 1— 6

*Edited by Thiru R. K. Parthasarathi,* M.A., L.T.
*and Thiru T. Sridhara Murti, Vidvān.*

5. WAQAE-I-HYDARY ... 38—53

*Edited by Syed Hamza Husain Omari,*
*Munshi-i-Fazil.*

# ADHIKĀRAṢAṄGRAHADĪPIKĀ - SAVYĀKHYĀ

*of*

KAUS'IKA RAṄGĀCĀRYA

*Edited by*

Thiru R. K. PARTHASARATHI, M.A., L.T.,

*and*

Thiru S'ri T. A. K. VENKATACHARIAR, *Śiromaṇi*

We have no small pleasure in offering, for the first time, to the scholarly public, interested in the academic study as well as in the practical pursuit of *Śrīvaiṣṇavism* and *Viśiṣṭādvaita*, the work entitled *Adhikārasaṅgrahadīpikā* with a lucid Commentary, both written by *Śrī Raṅgācārya* of *Kauśikagotram.*

We may not be accused of digression, if we write but a few lines on the illustrious life and outstanding works of *Śrīmad Vedānta Deśika*, the greatest exponent of *Śrīmad Rāmānuja's* system of religious philosophy, viz., *Viśiṣṭādvaita* and of the Northern School (*Vaḍakalai*) of *Śrīvaiṣṇavism*. An incarnation of the sacred Bell or the *Ghaṇṭā* of *Lord Veṅkaṭa* of the Seven Hills, *Veṅkaṭanātha*, more popularly known as *Vedānta Deśika* mastered all the learning current in his days, not only in religion but also in secular subjects, even before attaining the age of twenty. The title of *Kavitārkikasimha* could not have sat on any one with greater propriety, worthiness and grace. The title of *Vedāntadeśika* was conferred on him by no less than *Lord Śrī Raṅganātha* Himself! Living a life of utter, self-imposed poverty, counting solely on his ancestral property situate on the top of *Hastiśaila*, viz. *Lord Varadarāja* (अस्ति मे हस्तिशैलाग्रे वस्तु पैतामहं धनम्) and dedicating his life (which, like the great *Rāmānuja's*, ended in his one hundredth year in 1369) to study, teaching and composition of works, *Śrī Deśika* wrote voluminously, and in a versatile manner, one hundred and nineteen works in prose as also in verse, on a variety of subjects, couched in Sanskrit, Prākṛt, Tamil and Maṇipravālam. He compares most favourably with one of the greatest of English Poets, Milton, who was a scholar in various languages, wrote mostly on lofty,

religious themes, both in verse and in Prose and led a life of austerity, characterised by an earnestness of religious convictions and stubborn independence of character.

Of the multitudinous works of *Śrī Deśika,* which may be broadly classified under (1) Poetry and Drama (2) Devotional and Didactic Lyrics (3) Vedānta and (4) Commentaries, *Śrīmadrahasyatrayasāra* is a Prose-work in Tamil, his *magnum opus,* written in the *Maṇipravāla* style and interspersed with Sanskrit and Tamil verses. Coming into this world, as he did, some one hundred and fifty years after the great *Rāmānujācārya,* he had the additional advantage of being steeped in the religious lore and discussions that had intervened during that long interval. He has, therefore, succeeded remarkably in giving a clear, complete and comprehensive exposition of the more important doctrines of *Śrī Rāmānuja's* system of philosophy and of the religious *Sampradāyas,* associated with him and as interpreted and followed by the Northern School of *Śrīvaiṣṇavites,* in his *Śrīmadrahasyatrayasāra,* comprising 32 Adhikāras or Chapters and constituting an authoritative *Prapattiśāstra.*

It is a well-known fact that *Śrī Vedānta Deśika* himself has collected all the Sanskrit verses occurring at the beginning and the end of each Chapter of his own *Rahasyatrayasāra,* under the title of *Adhikārasaṅgraha,* with a view to summarising his teachings for the benefit of those who may not find the time to read through the voluminous original. This has been commented upon by *Śrībhāṣyam Śrīnivāsācārya* of *Kauśikagotram,* under the title of *Adhikārasaṅgrahavyākhyā* whose manuscript is enshrined in our Library, under D. No. 15640. The present work *Adhikārasaṅgrahadīpikā* by *Śrī Kauśika Raṅgācārya* of *Kauśikagotram,* embodies a Sanskrit metrical translation of all the Tamil verses embedded in *Rahasyatrayasāra.* It also contains a lucid, running Sanskrit Commentary (गन्धद्वयाख्यानम्, as it is called in Pandits' parlance) on the translated verses, written by the same author. One cannot say that all the translated Sanskrit verses in this work have an easy and rhythmic flow and sound melodious. But, if only one understands and appreciates the inherent difficulty in translating

a text in one language into another, especially when the text is of an esoteric nature and the translation is metrical, one will readily concede that the present translation is, undoubtedly, praiseworthy. That the author possesses commendable poetic abilities has been very clearly testified to by the introductory and concluding verses of the work. As stated by the author himself, his translation and commentary have been guided by and based on *Sārasvādinī*, the famous commentary on *Rahasyatrayasāra* (श्रीमत्सारास्वादिनीव्याख्ययार्थान् बुद्ध्वा तासां कौशिको रङ्गदासः ।.... लिलेख ।). He further says that the meaning of the Tamil verses has been rendered into Sanskrit, in his own words which closely follow those that are found in *Sārasvādinī* (गाथापदानां प्रायेण व्याख्यानस्थपदान्वितैः । स्वपदैरूच्यतेऽत्रार्थस्तात्पर्यार्थांशसंयुतः ॥) He adds with dignified modesty that *Sārasvādinī* is to be looked into by those who want to go deeper into the meaning and have their doubts completely cleared (संशयाः परिहाराश्च तात्पर्यार्थाश्च कृत्स्नशः । सारास्वादिनिव्याख्यायां द्रष्टव्यास्तद्बुभुत्सुभिः ॥)

As for the details of the author's life, the work does not offer much clue. He belongs to the *Kauśikagotram* (कौशिको रङ्गदासः) and is the son of one *Veṅkaṭācārya* of whom he speaks with great reverence and gratitude (श्लोकानेतान् वेङ्कटाचार्यसूनुस्तत्कारुण्यप्राप्तबोधो लिलेख) It is quite probable that he studied *the Śāstras* at the holy feet of his learned father. He is absolutely confident that it is only *Lord Hayagrīva* who has caused him—His devout worshipper—to write this metrical translation (श्लोकात्मना लेखयति स्वदासं तदर्थबोधाय तुरङ्गवक्त्रः). He pays his obeisance to the revered *Vedāntarāmānujamuni* (also known as *Sākṣātsvāmin*) and his illustrious disciple, *Gopālamahādeśika*, respectfully called *Tirukkuḍandai Deśikan*, because both of them have written the elaborate commentaries of *Pūrvasārāsvādinī* and *Uttarasārāsvādinī* respectively on *Rahasyatrayasāra*, which have provided the very basis for his work, *Adhikārasaṅgrahadīpikā*, as stated elsewhere. His respectful regard for *Śrī Vedāntadeśika* is naturally remarkable. Verses 4, 5 and 10 in the introductory portion of the work reveal the utter humility and modesty of the author which is but the hall-mark of real and rich scholarship and remind one of the famous introductory verses of *Kālidāsa's Raghuvaṃśa*

("क वेदान्तगुरुप्रोक्तगाथार्था: श्रुतिमौलिगाः ।
सर्वज्ञज्ञानविषयाः क्वाहमत्यन्तमन्दधीः ॥

तद्बुभुत्साप्रेरितः सन् प्रवृत्तोऽस्म्यतिसाहसे ।
रविसाध्ये तमोनाशे खद्योतः किं न सज्जते ॥

परस्य फल्गूनपि साधवो गुणान् प्रकाशयन्तोऽकृतदोषदर्शनाः ।
लोके महाकारुणिका विमत्सराः सन्तीति तेस्वार्थक एष मे श्रमः ॥"

"अधिकारसङ्ग्रहदीपिका")

It may be of interest to investigate whether this *Kauśika Raṅgacarya*, is the same as *Kuricci Raṅgacarya*, the author of *Nakṣatramalika* ", a Commentary on the well-known *Samanya-nirukti*. For both belong to the *Kauśikagotram* (इति कौशिककुलतिलकतार्किकशिरोमणिरङ्गाचार्यकृतौ नक्षत्रमालायां मृगशीर्षनक्षत्रम् — "नक्षत्रमालिका") are the sons of *Veṅkaṭacarya* (........वेङ्कटार्यादुदीतः............"नक्षत्रमालिका"), and as ardent devotees of *Lord Hayagrīva* ("तुरङ्गमोत्तमाङ्गः श्रीविहङ्गमशताङ्गवान् । तरङ्गयति मच्चेतस्यभङ्गुरसरस्वतीम् ॥"—"नक्षत्रमालिका"), are well-versed in *Tarka*, and other *Śastras* and have poetic abilities. It is for research - scholars to further examine whether the author of *Janmaṣṭamīnirṇaya*, who is the son of *Veṅkaṭa-deśika*, comes of the *Ilayavilli* family which belongs to the *Kauśikagotra*, and calls himself *Sattarkavacaspati*, even though he pays his obeisance to different *Ācaryas*, viz., *Srīnivasayogin* and *Vedantaraghavayogin*, can be identified with the author of the present work, *Adhikarasaṅgrahadīpika*. It is also noticed that the said Kuricci Raṅgacarya was the *Āsthanavidvan* of Ahobila Mutt during the periods of 36th and 38th Azhagiasingars, (1888–1910).

The following scheme has been successively adopted by the translator :—

(i) The first 10 verses in the Text are introductory ; (ii) The 6 Tamil verses in *Rahasyatrayasara* under "*Guruparampara-sara*" (Nos. 1 to 6) have been translated in 10 Sanskrit verses (Nos. 1 to 10) ; (iii) The 2 Tamil verses at the beginning and the end of the 1st *Adhikara* of *Rahasyatrayasara* (Nos. 7 and 8) have been translated in 2 Sanskrit verses (Nos. 11 and 12) ; (iv) The 32 Tamil verses found at the end of the remaining 31 *Adhikaras* of *Rahasyatrayasara* (Nos. 9 to 40) have been translated in 32 Sanskrit verses (Nos. 13 to 44) ; (v) The 16 additional Tamil

verses in *Adhikāras* 5, 19, 27, 29, 30 and 32 of *Rahasyatrayasāra* (Nos. 41 to 56) have been translated in 29 Sanskrit verses (Nos. 45 to 73). Here ends the Translation and (vi) the last two Sanskrit verses (Nos. 74 and 75) are concluding ones.

It may be noted that the Tamil and Sanskrit verses commencing from the *Guruparamparasāra* have been numbered serially. The numbers given to the Tamil verses are based on the serial order in which they have been translated by the author. The commentary ending with the 44th *Śloka* contains, within brackets, the serial numbers of the *Adhikāra* in *Rahasyatrayasāra* and the Sanskrit *Śloka*, respectively. Thereafter, the commentary bears three numbers within brackets, viz., the serial numbers of the *Adhikāra* in *Rahasyatrayasāra*, and the Sanskrit verse (as far as the additional Tamil verses are concerned) and the progressive total of Sanskrit verses, respectively.

The present edition of *Adhikārasaṅgrahadīpika* is based on the following manuscripts adorning our Library :

(1) R. 1008 (*a*)—Śrītāla—Grantha and Tamil Scripts—in good condition—complete ; (2) R. 1008 (b)—Śrītāla—Grantha and Tamil Scripts—in good condition—complete ; (3) R. 1029 (*a*)—Palm-leaf—Grantha and Tamil Scripts—much injured—complete ; (4) R. 1029 (*b*)—Palm-leaf—Grantha and Tamil Scripts — much injured — incomplete (covers only the first 15 Adhikāras) and R. 17926 — Paper — Davanāgarī and Tamil Scripts—in good condition—complete.

From out of the above manuscripts, R. 1008 (*b*) has been taken as the main manuscript and published as the present Text and three manuscripts, viz., R. 1008 (*a*) R. 1029 (*a*) and R. 1029 (*b*) have been collated with it. The variants have all been noted at the end of the work, the manuscripts having been indicated by the letters क [for R. 1008 (*a*)]; ख [for R. 1029 (*b*)] and ग [for R. 1029 (*a*)]. R. 17926 is but a restored copy of R. 1008 (*b*).

We cannot conclude better than by saying that we are now at the threshold of the eighth century of *Śrīmannigamāntamahādeśika's* benign descent into this mortal world, for the establishment of *Śrīvaiṣṇavism* and *Viśiṣṭādvaita*, on a firmer basis and on absolutely unaissalable grounds, thanks to the revered *Ācarya's* remarkable erudition in all branches of knowledge, fortified by his unparalelled polemic powers and that it is, therefore, but proper that a work relating to *Śrī Deśika's* *Śrīmadrahasyatrayasāra* which expounds the esoteric significance of the *eight-lettered Nārāyaṇa Aṣṭākṣara Mantra* is carried by our Bulletin, in this year, with justifiable pride.

R. K. PARTHASARATHI
*Curator.*

॥ श्रीः ॥

# ॥ विज्ञापनम् ॥

सुविदितमेवेदं सर्वेषां श्रीमतो वेङ्कटेशस्यावतारदिने पुण्ये तद्घण्टांशत्वेन श्रीकाञ्च्यामवतीर्णाः श्रीभगवद्रामानुजसिद्धान्तप्रतिष्ठापनधुरन्धराः श्रीरङ्गादि-दिव्यदेशावासरसिका वेदान्तद्वयं साङ्गं सरहस्यं 'सदस्यं रहस्यञ्च' स्वाश्रितान् सम्यगध्याप्य, समुज्जीवयन्तो विराजन्ते स्म कवितार्किकसिंहाः सर्वतन्त्रस्वतन्त्रा आचार्यसार्वभौमाः श्रीमन्निगमान्तमहादेशिकपादा इति ।

त इमे ह्याचार्यचरणा बहून् ग्रन्थानन्वगृह्णन्निति के नाम विद्वांसो न विदन्ति ? तानेतान् महतोऽस्मत्सुकृतपरिपाककृतावतरणानाश्रित्य "वेङ्कटनाथः" "वेदान्ताचार्यः" इत्यादीन्यमृतायमानानि नामधेयानि प्रथन्त इति च सुविज्ञातमेव ।

श्रीवेङ्कटाद्रिशिखरालयकालमेघ इव सकलचेतनसंरक्षणैकधुरन्धरा आचार्य-सार्वभौमा इमे निजपादपद्माश्रितान् निखिलान् साधुषट्पदान् सदुपदेशैः, सदनुष्ठापनद्वारा च भगवदभिमतिविषयान् कारयित्वा स्वरूपोचितपुरुषार्थामृतं प्रापय्य सम्यगुज्जीवयामासुः ।

एवमेवार्वाचीनानामस्माकमपि समुज्जीवनाय कान्तासंमिततया सद्यः सरस-प्रतिपत्तये काव्यनाटकाद्यात्मना, सुप्रतिष्ठिताध्यवसायसिद्धये सत्तर्कोज्ज्वलशारीरक-शास्त्रेण स्वतन्त्रव्याख्याद्वयरूपेण, द्रवच्चित्तबाष्पाम्बुपुलकोद्गमसहितं साक्षात्कारा-परपर्यायं किमप्यनिर्वचनीयं स्वानुभवैकगम्यं ज्ञानवैशद्यमुत्पादयितुं, अनन्तकल्याण-गुणगणवैभवं विभावयित्रा काङ्क्षाधिकं वर्षमाणेन श्रोत्रपेयेन मङ्गलनामबहुलेन स्तोत्रबृन्दजलदेन च भगवतः परब्रह्मणः श्रीमतो नारायणस्य पारम्यं, शेषित्वं, सौलभ्यं, प्राप्यत्वं, च निरवधिकमसाधारणं, गैर्वाण्यां द्राविड्यां च वाण्यामनित-रसाधारणया रीत्या प्रकाशयन्तः, चिदचिदीश्वरस्वरूपयाथात्म्यविज्ञानं करुणया परमया च समन्वग्रहीषुः ।

तेषु च ग्रन्थरत्नेष्वर्घ्यतमे श्रीमद्रहस्यत्रयसाराभिधाने प्रबन्धरत्ने, सकल-वेदसारभूतस्य, श्रुतितात्पर्यसङ्ग्राहकस्य, मुमुक्षूपास्यस्य, निरतिशयभोग्यस्य, तत्त्वत्रयस्वरूपस्वभावादर्शतलस्य, भगवतैव प्रकाशितस्य रहस्यत्रयस्य व्याख्यानतया स्थिते द्वात्रिंशदधिकारसहिते वेदान्तद्वयसिद्धान्तं करतलामलकवत् प्रकाशित-माचार्यप्रकाण्डैर्मणिप्रवालमालयेव गैर्वाणीद्रामिडीभाषाद्वयपदसुभगया शैल्या।

अत्र च श्रीमद्रहस्यत्रयसारे प्रत्यधिकारम्, आदावन्ते च, अधिकारार्थ-प्रकाशकतया गैर्वाण्या द्रामिड्या च सुनिबद्धा हृदयङ्गमाः श्लोका गाथाश्च प्रसादिताः। तासां सुगाथानां द्रामिडीनां तद्भाषानभिज्ञानामपि शास्त्रार्थप्रबोधनाय गैर्वाण्यां पद्यरूपेणानुवादोऽनुगृहीतः श्रीमद्भिः कौशिकरङ्गाचार्यैः। तस्यैव दुरूहविषयप्रकाशने दीपतुल्यस्य ग्रन्थस्य "अधिकारसङ्ग्रहदीपिके"ति नाम, याऽस्यां सञ्चिकायां प्रस्तूयते। अस्य लघु व्याख्यानमपि तैरेव प्रसादितम्। अवसरप्राप्तमिदञ्च कथ्यते यदाचार्यपादैः श्रीमद्रहस्यत्रयसारे आदावन्ते च गैर्वाण्यां प्रकाशितस्य श्लोकजातस्य सङ्ग्रहतया निर्मितस्य अधिकारसङ्ग्रहाख्यस्य पृथग्ग्रन्थस्य "अधिकारसङ्ग्रहव्याख्या"नामकं व्याख्यानं कौशिकान्वयैः श्रीभाष्यश्रीनिवासाचार्यैरनुगृहीतं वर्तत इति।

ते चामी कौशिकरङ्गाचार्यवर्याः श्रीमतो वेदान्तरामानुजमुनिपुङ्गवान् गोपालमहादेशिकांश्च प्रणम्य प्रस्तुवन्ति प्रबन्धमिमम्। त इमे, सामान्यनिरुक्ति-टिप्पण्या नक्षत्रमालिकाया रचयितारः कुरुच्चि रङ्गाचार्यवर्याश्च, अभिन्ना इति ज्ञायते; यत उभयत्र श्रीहयग्रीवभक्तिपरीवाहः श्रीवेङ्कटाचार्यादात्मनः सम्भवश्च प्रकाशते। अन्ते च तत्र टिप्पण्यां "इति कौशिककुलतिलकतार्किकशिरोमणि-रङ्गाचार्यकृतौ नक्षत्रमालायां मृगशीर्षनक्षत्रम्" इति लक्ष्यते। एवमेव जन्माष्टमी-निर्णयप्रबन्धारो वेङ्कटदेशिकतनया बालधन्व्यन्वयसम्भूता अपि एतदभिन्ना इति प्रतिभात्यस्माकम्। यतः तस्मिन् ग्रन्थे "सत्तर्कवाचस्पति" रित्यात्मानमावेदयन्ति। परं तु जन्माष्टमीनिर्णयग्रन्थे श्रीनिवासयोगिनं वेदान्तराघवयोगिनञ्च प्रणमन्त्यमी पण्डिताग्रेसराः।

अस्मदीये कोशागारे च अधिकारसङ्ग्रहदीपिकायाः सव्याख्यायाः चत्वारः कोशास्तालपत्रमया विलसन्ति। तत्र द्वावतीव शिथिलौ। द्वावपरौ न तथाविधौ। तानवलम्ब्य कागदीयं पुस्तकं लिखितमेकमस्मन्निकटे वर्तते। तत्र

अन्यतमः कोशस्त्वपूर्णः, पञ्चदशाधिकारानेव बिभर्ति । सर्वानेतान् समीक्ष्य यथोचितं यथामति च पाठान्तराणि परिदर्श्य प्रकाश्यतेऽयं ग्रन्थवरः ।

दीपिकाकाराः, आदितः प्रभृति, आन्तं, द्वात्रिंशदधिकारेष्वधिकारान्ते विद्यमानाः सुगाथाः प्रथमं सव्याख्यानमनूद्य, अन्तेऽधिकारविशेषेषु मध्ये मध्ये आचार्यसार्वभौमैरनुगृहीताः सुगाथाः गैर्वाण्यामनूद्य व्याचक्षते ।

परममिदममन्दानन्दस्थानं सार्वजनीनं यच्छ्रीमन्निगमान्तमहादेशिकपादानामवतारतोऽद्य अष्टमशताब्दारम्भे श्रीमदष्टाक्षरार्थप्रकाशनैकधुरन्धरस्य श्रीमद्रहस्यत्रयसाराख्यग्रन्थरत्नस्य, अनुवादसङ्ग्रहात्मकोऽयं ग्रन्थः सव्याख्यानं प्रकाश्यते हन्त ! अस्मद्भागधेयवशादिति ॥

इति विधेयः,

**रा. कृ. पार्थसारथिः** (अध्यक्षः)

**ति. अ. कृ. वेङ्कटाचार्यः** (पण्डितः)

मद्रपुरराजकीयप्राच्यलिखितकोशनिलयः

॥ श्रीः ॥

सर्वार्थसिद्धिहेतुर्बहुविधरक्षानिवर्तितानिष्टः ।
त्रय्यन्तविश्रुताख्यः कोऽपि श्रीवेङ्कटेश्वरो जयति ॥

॥ सारविवरणी ॥

—: * :—

विहितभुवनरक्षा वेदचूडार्यनामा
कुमतिदनुजसङ्घध्वंसनायावतीर्णा ।
निरवधिमहिमासौ देवता मानसे मे
विलसतु विनतानां कामनां सन्दुहाना ॥

॥ सारास्वादिनी ॥

—: * :—

இரஹஸ்யத் திரயத்தி னெழிற்சாரப் பொருளெல்லா
முரகமெல் லணையாம்போ லுரைசெய்தா னடியோர்க்கு
குருகூரும் கந்தாடை பெரியப்பன் குரைகழலே
யொருகாலும் மறவாம லுரைகண்டா யென்மனமே

" ஸாரதீபிகை "

—: * :—

॥ श्रीः ॥

# ॥ अधिकारसङ्ग्रहदीपिका-सव्याख्या ॥

॥ कौशिकरङ्गदासकृता ॥

नमश्श्रीवरदार्याय श्रीमद्वेङ्कटसूरये ।
तद्गुरुभ्यश्च सर्वेभ्यः श्रियै तद्वल्लभाय च ॥ १ ॥

[1]त्रय्यन्तसूरिर्मे दद्यादज्ञान्धज्ञानदक्प्रदः ।
रहस्यत्रय[2]सारोक्तगाथासु विमलां धियम् ॥ २ ॥

[3]श्रीमद्रहस्यत्रयसारसम्यग्व्याख्यानतोऽज्ञान् स्वजनानवन्तम् ।
वेदान्तरामानुज[4]संयमीन्द्रं तच्छात्रगोपालगुरुश्च [5]नौमि ॥ ३ ॥

क्व वेदान्तगुरुप्रोक्तगाथार्थाश्श्रुतिमौलिगाः ।
सर्वज्ञज्ञानविषयाः क्वाहमत्यन्तमन्दधीः ॥ ४ ॥

तद्बुभुत्साप्रेरितस्सन् प्रवृत्तोऽस्म्यतिसाहसे ।
रविसाध्ये तमोनाशे खद्योतः किं न सज्जते ॥ ५ ॥

श्रीमद्रहस्यत्रयसारतत्तदधिक्रियासङ्ग्रहचारुगाथाः ।
श्लोकात्मना लेखयति स्वदासं तदर्थबोधाय तुरङ्गवक्त्रः ॥ ६ ॥

श्रीमत्सारास्वादिनीव्याख्ययार्थान् बुद्ध्वा तासां [6]कौशिको रङ्गदासः ।
श्लोकानेतान् वेङ्कटाचार्यसूनुस्तत्कारुण्यप्राप्तबोधो लिलेख ॥ ७ ॥

गाथापदानां [7]प्रायेण व्याख्यानस्थपदान्वितैः ।
[8]स्वपदैरुच्यतेऽत्रार्थस्तात्पर्यार्थांशसंयुतः ॥ ८ ॥

[9]संशयाः परिहाराश्च तात्पर्यार्थाश्च कृत्स्नशः ।
सारास्वादिनिव्याख्यायां द्रष्टव्यास्तद्बुभुत्सुभिः ॥ ९ ॥

---

पाठान्तराणि ग्रन्थान्ते प्रदर्शितानि

[1]परस्य फल्गूनपि साधवो गुणान् प्रकाशयन्तोऽ [2]कृतदोषदर्शनाः ।
लोके महाकारुणिका विमत्सरास्सन्तीति तैस्सार्थक एष मे श्रमः ॥१०॥

॥ [3]श्रीमते वेदान्तगुरवे नमः ॥

—: * :—

## ॥ गुरुपरम्परासारः ॥

பொய்கைமுனி பூதத்தார் பேயாழ்வார்தண்
பொருநல்வருங் குருகேசன் விட்டுசித்தன்,
துய்யகுல சேகரனம் பாணநாதன்
றொண்டரடிப் பொடிமழிசை வந்தசோதி
வையமெல்லா மறைவிளங்க வாள்வேலேந்து
மங்கையர்கோ னென்றிவர்கண் மகிழ்ந்துபாடுஞ்
செய்யதமிழ் மாலைகளுந் தெளியவோதித்
தெளியாத மறைநிலங்க டெளிகின்றோமே. (க)

[4]कासारो भूतयोगी महदभिधमुनिर्योगिवाहोऽङ्घ्रिरेणु-
र्भक्तानां शीतताम्रातटभवकुरुकाधीश्वरो विष्णुचित्तः ।
शुद्धो राज्ञां कुले [5]शेखर उदितमपि श्रीमहीसारपुर्यां
ज्योतिश्श्रीभक्तिसारस्सकलजगति वेदार्थसम्यक्प्रदीप्त्यै ॥ १ ॥

खड्गं कुन्तश्च [6]लक्ष्मीनगरगतजनाधीश्वरस्सन्दधच्चे-
त्येतै[7]रानन्दगीता द्रमिडसुफणितीर्माल्यवच्छ्रीधरेण ।
मूर्ध्ना श्लाघ्याश्च ऋज्वीर्वय[8]मतिकृपणास्सार्थमभ्यस्य नीत्या
स्मृत्या चानिश्चितार्थश्रुतितलमकलङ्कं हि विद्मो यथावत् ॥ २ ॥

[9]महदभिधमुनिः शीतताम्रातटभवकुरुकाधीश्वरः विष्णुचित्तः शुद्धो राज्ञां कुले शेखरः [10]योगिवाहः अस्मन्नाथः भक्तानामङ्घ्रिरेणुः महीसारपुर्यामुदितं ज्योतिः भक्तिसारः सकलजगत्यपि वेदार्थसम्यक्प्रदीप्त्यै खड्गं कुन्तञ्च सन्दधत् [11]लक्ष्मीनगरगतजनाधीश्वरश्चेत्येतैः आनन्दगीताः माल्यवत् श्रीधरेण मूर्ध्ना श्लाघ्या ऋज्वीश्च द्रमिडसुफणितीः अतिकृपणा वयं [12]सार्थं यथा तथा अभ्यस्य नीत्या स्मृत्या च अनिश्चितार्थश्रुतितलं [13]अकलङ्कं यथा तथा यथावत् विद्मो हीति श्लोकद्वयस्य एकान्वयः । मुनिवाह [योगिवाह] इति पदस्यानन्तरं अस्मन्नाथ इति शेषः ॥ २ ॥

இன்பத்தி லிறைஞ்சுதலி லிசையும்பேற்றி
லிகழாத பல்லுறவி லிராகம்மாற்றில்,
தன்பற்றில் வினைவிலக்கிற் றகவோக்கத்திற்
றத்துவத்தை யுணர்த்துதலிற் றன்மையாக்கில்,
அன்பர்க்கே யவதரிக்கு மாயனிற்க
வருமறைக டமிழ்செய்தான் றுளேகொண்டு
துன்பற்ற மதுரகவி தோன்றக்காட்டுந்
தொல்வழியே நல்வழிக டுணிவார்கட்கே. (உ)

[1]आनन्दे श्रयणेऽभ्युपेयपुरुषार्थे च च्युतिप्रोज्झिता-
नेकाकारसुबान्धवेऽप्यनुचितेष्वर्थेषु रागोज्झने ।
स्वेनोत्पादन आत्मसंश्रयविधेः पापस्य [2]चोत्पादने
कारुण्यातिशये च तत्त्वधिय उत्पादे स्वभावस्य च ॥ ३ ॥

भक्तानां दशधो[3]दितेऽत्र विषये कृष्णेऽवतीर्णे स्थिते
तं त्यक्त्वा द्रमिडाश्श्रुतीर्विदधतस्सूक्ष्मा गृहीत्वा पदे ।
[4]अभ्रान्त्या कविना प्रकाशितगुरूपासात्मकानादिस-
न्मार्गे धैर्यवतां विमुक्तिजनको मार्गस्तथान्यो न हि ॥ ४ ॥

आत्मसंश्रयविधेः स्वेनोत्पादने तत्त्वधियः स्वभावस्य च उत्पादे सूक्ष्माः श्रुतीः द्रमिडाः विदधतः पदे गृहीत्वा, इति स्थल[5]त्रये एवमन्वयः । अन्यत्रान्वयः [6]सुकरः । श्लोकद्वयमपि एकान्वयम् । कविनेति पदस्य पूर्वं मधुरेति शेषः ॥ ४ ॥

என்னுயிர்தந் தளித்தவரைச் சரணம்புக்கி
யானடைவே யவர்குருக்க ணிரைவணங்கிப்
பின்னருளாற் பெரும்பூதூர் வந்தவள்ளல்
பெரியநம்பி யாளவந்தார் மணக்கால்நம்பி
நன்னெறியை யவர்க்குரைத்த வுய்யக்கொண்டார்
நாதமுனி சடகோபன் சேனைநாதன்
இன்னமுதத் திருமகளென் றிவரைமுன்னிட்
டெம்பெருமான் றிருவடிக ளடைகின்றேனே. (ங)

ஆரண நூல்வழிச் செவ்வை யழித்திடு மைதுகர்க்கோர்
வாரண மாயவர் வாதக் கதலிகண் மாய்த்தபிரான்
ஏரணி கீர்த்தி யிராமா னுசமுனி யின்னுரைசேர்
சீரணி சிந்தையி னேஞ்சிந்தி யோமினித் தீவினையே. (௪)

मदात्मानं [1]शेषो भगवत इति ज्ञान[2]कलना-
दवन्तं स्वाचार्यं शरणमुपगम्याहमवितः ।
तदाचार्यश्रेणिं क्रमत उपनम्याथ कृपया
[3]समुद्भूतो भूते [4]पुरवर [5]उदारो [6]यतिपतिः ॥ ५ ॥

[7]गुरुः पूर्णः श्रीयामुन[8]गुरुरपि श्रीरघु[9]पतिः
प्रपत्त्याख्यं मार्गं कमलनयन[10]स्तस्य वितरन् ।
[11]मुनिर्नाथो नत्वा शठरिपुचमूपौ प्रथमत-
[12]स्सुभोग्या श्रीश्वेतानिति [13]भगवदङ्घ्री त्वथ भजे ॥ ६ ॥

अवितः अहं मदात्मानं भगवतश्शेष इति ज्ञानकलनादवन्तं स्वाचार्यं शरणमुपगम्य, [14]तस्य प्रपत्त्याख्यं मार्गं वितरन् कमलनयनः नाथः मुनिः शठरिपुचमूपौ सुभोग्या श्री[15]श्च इत्येतान्, प्रथमतः नत्वा [16]अथ भगवदङ्घ्री तु भजे, इति श्लोकद्वयस्य एकान्वयः ॥ ६ ॥

वेदान्तन्यायसूत्रार्जवविहतिकृतां हैतुकानामतुल्य-
प्रोद्दामेभस्य तद्वाग्विलसितकदलीभञ्जकस्योपकर्तुः ।
लोकार्हाकल्पकीर्तेर्न वयमथ युताश्चिन्तया भाष्यकर्तु-
र्भोग्योक्त्याश्लिष्टया सद्गुणविलसितया क्रूरकर्म स्मरामः ॥ ७ ॥

[17]लोकार्हाकल्पकीर्तेः भाष्यकर्तुः भोग्योक्त्याश्लिष्टया सद्गुणविलसितया चिन्तया युता वयं, अथ क्रूरकर्म न स्मराम इत्यन्वयः ॥ ७ ॥

நீளவந் தின்று விதிவகை யானினை வொன்றியநாம்
மீளவந் தின்னும் வினையுடம் பொன்றி விழுந்துழலா
தாளவந் தாரென வென்றரு டந்து விளங்கியசீர்
ஆளவந் தாரடி யோம்படி யோமினி யல்வழக்கே. (௫)

**संसारेऽनादिकालं द्रुततरगमनं संविधायेह जन्म-**
**न्यात्मज्ञानादिभाजो विधि[1]विपरिणतेरन्यशेषत्व[2]धीजात् ।**
**श्रीमत्तद्भक्तवैमुख्यत इह पुनरावृत्य पश्चाच्च देहे**
**त्वात्मभ्रान्त्यादियुक्ता वयमथ नरके सन्निपत्योग्रबाधाः ॥ ८ ॥**

**नाविन्देम यथेशदास्यमतिमुत्पाद्यावितुं नस्तथा**
**सम्भूतोऽयमिति स्तुतस्य[3]कुमतिं जित्वा [4]च कृत्वा दयाम् ।**
**भास्वद्भव्यगुणस्य यामुनमुने[5]र्भूत्वेह दासा वयं**
**पश्चान्नव पठेम दुर्मतिकृता अन्यायमूलाः कृतीः ॥ ९ ॥**

[6]इह जन्मनि विधि[7]विपरिणतेः आत्मज्ञानादिभाजः वयं अन्यशेषत्वधीजात् श्रीमत्तद्भक्तवैमुख्यत इह पुनरावृत्य [8]पश्चाच्च दुष्कर्मजन्ये दुष्कर्मजनके च देहे आत्मभ्रान्त्यादियुक्ताः सन्तः, यथा नरके सन्निपत्य उग्रबाधाः नाविन्देम, तथा नः ईशदास्यमतिमुत्पाद्य अवितुं अयं सम्भूत इति स्तुतस्य [9]कुमतिं जित्वा [10]दयां च कृत्वा भास्वद्भव्यगुणस्य यामुन[11]मुनेः वयं इह दासा भूत्वा[12]पश्चात् दुर्मतिकृताः अन्यायमूलाः कृतीः नैव [13]पठेमेति श्लोकद्वयस्य एकान्वयः । देहे इति पदस्य पूर्वं दुष्कर्मजन्ये दुष्कर्मजनके इति शेषः ॥ ९ ॥

காளம் வலம்புரி யன்னநற் காத லடியவர்க்குத்
தாளம் வழங்கித் தமிழ்மறை யின்னிசை தந்தவள்ளல்
மூளுந் தவனெறி மூட்டிய நாத முனிகழலே
நாளுந் தொழுதெழு வோநமக் கார்நிகர் நானிலத்தே. (சு)

**वादे काहलशङ्खवद्ध्वनिमतोस्[14]सद्भक्तिमच्छिष्ययो-**
**र्गान्धर्वं [15]द्रमिडश्रुतेश्च मधुरं [16]गानं निगद्यागमम् ।**
**[17]दातुश्चेह मुमुक्षु[18]काम्यभजनाद्यध्वप्रतिष्ठाकृतः**
**पादौ नाथमुनेः प्रणम्य भुवि चोज्जीवेम को नस्सदृक् ॥ १० ॥**

गान्धर्वं आगम [19]द्रमिडश्रुतेः मधुरं गानञ्च [20]निगद्य दातुः इह मुमुक्षु-[21]काम्यभजनाद्यध्वप्रतिष्ठाकृतः नाथमुनेः पादौ प्रतिदिनं प्रणम्य उज्जीवेम नः [22]भुवि कः सदृगित्यन्वयः । [23]प्रणम्येति पदस्य पूर्वं प्रतिदिनमिति शेषः ॥ १० ॥

॥ गुरुपरम्परासारः सम्पूर्णः ॥

॥ श्रीमद्रहस्यत्रयसारे उपोद्घाताधिकारः प्रथमः ॥ १ ॥

ஆளு மடைக்கல மென்றெம்மை யம்புயத் தாள்கணவன்
தாளிணை சேர்ந்தெமக் குமவை தந்த தகவுடையார்
மூளு மிருள்கள் விள்ளமுயன் ஞேதிய மூன்றினுள்ளும்
நாளு முகக்கவிங் கேநமக் கோர்விதி வாய்க்கின்றதே. (எ)

स्वीकुर्यान्नस्स्व[1]रक्ष्यानिति कमलवसच्छ्रीपतेः पादयुग्मं
संश्रित्योपायमेवं [2]तदिह तु करुणाशालिभिर्नो ददद्भिः ।
उद्युक्तैर्जृम्भमाणं निरसितुममतिध्वान्तमार्यैः प्रदिष्टं
भोक्तुं नः श्रीरहस्यत्रयहृदयमिह प्राप्तमेकं हि भाग्यम् ॥ ११ ॥

नः स्वरक्ष्यान् स्वीकुर्यादिति कमलवसच्छ्रीपतेः पादयुग्मं उपायं संश्रित्य, [3]तत् एवं नः ददद्भिः करुणाशालिभिर्जृम्भमाणं अमतिध्वान्तं निरसितुं उद्युक्तैः आर्यैः प्रदिष्टं श्रीरहस्यत्रयहृदयं [4]इह सर्वदा भोक्तुं नः एकं भाग्यं प्राप्तं हीत्यन्वयः । भोक्तुमिति पदस्य पूर्वं सर्वदेति शेषः ॥ १ ॥ ११ ॥

திருவுடன் வந்த செழுமணி போற்றிரு மாலிதயம்
மருவிட மென்ன மலரடி சூடும் வகைபெறுநாம்
கருவுடன் வந்த கடுவினை யாற்றில் விழுந்தொழுகா
தருவுட னைந்தறி வாரருள் செய்ய வமைந்தனரே. (அ)

लक्ष्म्या सार्धं समुद्यत्सुमहितमणिवच्छ्रीशवक्षोनिवास-
स्थानं नोऽ[5]प्युक्तियोग्यन्त्विति तदभिमताः कर्तुमब्जाङ्घ्रिदास्यम् ।
योग्या [6]गर्भागतोग्रांहसि सरिति यथा नो निपत्य स्रवामः
पञ्चार्थज्ञास्त[7]थालं फणितुमभिमतान् सूक्ष्मसम्बन्धयुक्तम् ॥ १२ ॥

मणिवत् नोऽ[8]पि श्रीशवक्षः निवासस्थानमिति [9]उक्तियोग्यं यथा तथा, तदभिमतास्सन्तः अब्जाङ्घ्रिदास्यं कर्तुं योग्या वयं [10]गर्भागतोग्रांहसि सरिति निपत्य यथा नो स्रवामः, [11]तथा सूक्ष्मसम्बन्धयुक्तं यथा तथा पञ्चार्थज्ञाः [12]अभिमतान् फणितुमलमित्यन्वयः । योग्या इत्यनन्तरं वयमिति शेषः ॥ १ ॥ १२ ॥

## सारनिष्कर्षाधिकारो द्वितीयः ॥ २ ॥

அமையா விவையென்னு மாசையி னுலறு மூன்றுலகிற்
சுவையான கல்விகள் சூழவந் தாலுந் தொகையிவையென்
றிமையா விமையவ ரேத்திய வெட்டிரண் டெண்ணியநம்
சமையா சிரியர் சதிர்க்குந் தனிநிலை தந்தனரே. (கூ)

एता नालं पुनश्चाभ्यसितुमिह भरास्तृष्णयाष्टादशापि
ज्ञाताः कार्त्स्न्येन विद्याः [1]कथमपि गणनापूरका इत्यवेत्य ।
मत्यास्सङ्कोचशून्यैर्महितमथ सुरैश्चिन्तयन्तोऽष्टवर्णा-
द्याचार्यास्सारभूते स्थितिमुपदिदिशुर्दर्शनस्थापका नः ॥ १३ ॥

एता नालं पुनश्च अभ्यसितुं तृष्णया इह भराः अष्टादश विद्याः [2]कथमपि कार्त्स्न्येन ज्ञाता अपि गणनापूरका इति अवेत्य मत्यास्सङ्कोचशून्यैः सुरैः महितं अष्टवर्णादि चिन्तयन्तः असद्दर्शनस्थापकाः आचार्याः नः सारभूते स्थितिमुपदिदिशुरित्यन्वयः ॥ २ ॥ ॥ १३ ॥

## प्रधानप्रतितन्त्राधिकारस्तृतीयः ॥ ३ ॥

நிலைதந்த தாரக னியந்த மிக்கு மிறைவனுமாய்
இலதொன் றெனுவகை யெல்லாந் தனதெனு மெந்தையுமாய்த்
துலையொன் றிலையென நின்ற துழாய்முடி யானுடம்பாய்
விலையின்றி நாமடி யோமென்று வேதியர் மெய்ப்பொருளே. (ங)

[3]स्थित्यादीन् कल्पयित्वा [4]दधदखिलजगच्चेश्वरस्तन्नियन्तुं
[5]किञ्चिच्छेषं न चास्येत्यगदित इति च स्वस्य शेषं [6]समस्तम् ।
[7]उक्तस्वामी स्थितस्यासम इति तुलसीमौलिकस्यैव देहा
मुक्त्वोपाधिञ्च दासा वयमिति निगमज्ञार्यसत्यार्थ [8]एषः ॥ १४ ॥

[9]स्थित्यादीन् कल्पयित्वा अखिलजगत् दधत् तन्नियन्तुं [10]ईश्वरः किञ्चिदपि अस्य न शेषमित्यवगदितः समस्तं स्वस्य शेषमिति उक्तस्वामी असम इति च स्थितस्य तुलसी[11]मौलिकस्यैव वयं देहाः उपाधिं मुक्त्वा दासाश्चेति निगमज्ञार्यसत्यार्थ [12]एष इत्यन्वयः ॥ ३ ॥ १४ ॥

## अर्थपञ्चकाधिकारश्चतुर्थः ॥ ४ ॥

பொருளொன் றெனநின்ற பூமக ளுதை னவனடிசேர்ந்
தருளொன்று மன்ப னவன்கொ ளுபாய மமைந்தபயன்
மருளொன் றியவினை வல்விலங் கென்றிவை யைந்தறிவார்
இருளொன் றிலாவகை யென்மனந் தேற விளம்பினரே. (கக)

[1]श्रीशस्त्वेकः पुमर्थः [2]स्थित इति स पदे तस्य संश्रित्य जीवः
स्नेही कारुण्यपात्रं तदभिमत[3] उपायश्च योग्यं फलञ्च ।
[4]निष्कम्पा शृङ्खला चामतियुतदुरितात्मेति चैतान्विदन्तः
पञ्चार्थान्नोऽब्रुवन् हृद्यपगतनिखिलभ्रान्तिशङ्कं न आर्याः ॥ १५ ॥

[5]स एक एव पुमर्थ इति स्थितः श्रीशः, तस्य पदे संश्रित्य कारुण्यपात्रं स्नेही [6]जीवश्च, तदभिमत उपायश्च, योग्यं फलञ्च, [7]निष्कम्पा अमतियुतदुरितात्मा शृङ्खला च इत्येतान् पञ्च अर्थान् विदन्तः नः आर्याः नः [8]हृदि अपगतनिखिल-भ्रान्तिशङ्कं यथा तथा [9]अब्रुवन्नित्यन्वयः ॥ ४ ॥ ॥ १५ ॥

## तत्त्वत्रयचिन्तनाधिकारः पञ्चमः ॥ ५ ॥

தேற வியம்பினர் சித்து மசித்து மிறையுமென
வேறு படும்வியன் றத்துவ மூன்றும் வினையுடம்பில்
கூறு படுங்கொடு மோகமுந் தானிறை யாங்குறிப்பும்
மாற நினைந்தரு ளான்மறை நூல்தந்த வாதியரே. (கஉ)

ऊचुर्निस्संशयं नश्चिदचिदधिपतिश्चेति भिन्नं विचित्रं
तत्त्वत्रित्वञ्च कर्मान्वितवपुषि दृढा बह्वनर्थ[10]प्रदा च ।
आत्मभ्रान्तिः स्वतन्त्रो[11]ऽस्म्यहमिति न परस्यास्मि शेषो भ्रमश्च
व्युच्छिन्नः स्याद्धि मत्वा न इति करुणया वेदशास्त्रप्रदार्याः ॥ १६ ॥

वेदशास्त्रप्रदार्याः [12]करुणया कर्मान्वितवपुषि दृढा बह्वनर्थ[13]प्रदा, आत्म-[14]भ्रान्तिश्च, अहं स्वतन्त्रोऽस्मि, परस्य शेषो नास्मि, इति भ्रमश्च नः व्युच्छिन्नः स्यादिति मत्वा चित् अचित् अधिपतिश्चेति भिन्नं विचित्रं तत्त्वत्रित्वं [15]नः निस्संशयं यथा तथा ऊचुरित्यन्वयः ॥ ५ ॥ ॥ १६ ॥

## परदेवतापारमार्थ्याधिकारष्षष्ठः ॥ ६ ॥

வாதியர் மன்னுந் தருக்கச் செருக்கின் மறைகுலையச்
சாது சனங்க ளடங்க நடுங்கத் தனித்தனியே
ஆதி யெனுவகை யாரண தேசிகர் சாற்றினர் நம்
போத மருந்திரு மாதுட னின்ற புராணனையே. (கசு)

**वेदेभ्यस्सर्वसद्भ्यो [1]विरचितमिभ यथा स्वस्वभातः प्रजेशः**
**[2]शर्वो वेन्द्रो जगत्कारणमिति [3]कथकास्तर्कगर्वेण नोचुः ।**
**[4]दुर्वारेण प्रसिद्धं श्रुतिषु सरसिजावासलक्ष्मीयुवत्या**
**वेदान्तार्यास्समेतं पुरुषमभिदधुस्तं तथादिं पुराणम् ॥ १७ ॥**

कथकाः दुर्वारेण तर्कगर्वेण स्वस्वभातः [5]प्रजेशो वा शर्वो वा इन्द्रो वा जगत्कारणमिति वेदेभ्यस्सर्वसभ्यश्च [6]विरचितमिभ यथा तथा नोचुः, तथा वेदान्ताचार्याः श्रुतिषु प्रसिद्धं सरसिजावासलक्ष्मीयुवत्या समेतं तं पुराणं पुरुषं आदिमभिदधुरित्यन्वयः ॥ ६ ॥ ॥ १७ ॥

## मुमुक्षुत्वाधिकारस्सप्तमः ॥ ७ ॥

நின்ற புராண னடியிணை யேந்து நெடும்பயனும்
பொன்றுத லேநிலை யென்றிடப் பொங்கும் பவக்கடலும்
நன்றிது தீய தென்றுந வின்றவர் நல்லருளால்
வென்று புலன்களை வீடினை வேண்டும் பெரும்பயனே. (கஎ)

**श्रीयुक्ता[7]दादिपुंसः पदयुगधृतिमद्दीर्घदास्यं पुमर्थं**
**नाशित्वैकस्वभावोक्त्यनुगुणमुहुरुद्रेकसंसारवार्धिम् ।**
**साध्वेतत् साधु नैतत्त्विति [8]समुपदिशत्सूरिसम्यक्कृपातो**
**[9]धीमान् जित्वेन्द्रियाणि प्रबलफलमिहापेक्षते मोक्षमेकः ॥ १८ ॥**

साध्वसाधुशब्दाभ्यां दास्यपुमर्थसंसारवार्धी विवक्षितौ । [10]अन्वयः सुकरः ॥ ७ ॥ ॥ १८ ॥

## अधिकारिविभागाधिकारोऽष्टमः ॥ ८ ॥

வேண்டு பெரும்பயன் வீடென் றறிந்து விதிவகையால்
நீண்டுங் குறுகியு நிற்கு நிலைகளுக் கேற்குமன்பர்
மூண்டொன்றின் மூல வினைமாற் றுதலின் முகுந்தனடி
பூண்டன்றி மற்றோர் புகலொன் றிலையென நின்றனரே (கூ)

[1]मोक्षस्सम्प्रार्थनीयं सु[2]महदिति फलं दैवयोगाद्विदित्वा
दीर्घाल्पानेहसार्हा भजनवरणयोस्साध्ययोर्मोक्षकामाः ।
[3]तत्रैकस्मिन् प्रवृत्य स्वसदृशि भवमूलोग्रकर्मापनोदे
मुक्त्वेशाङ्घ्रिप्रपत्तिं किमपि न हि परं साधनं त्वित्यतिष्ठन् ॥ १९ ॥

सम्प्रार्थनीयं सुमहत् फलं मोक्षमिति विदित्वा दीर्घाल्पानेहसा साध्ययोर्भजनवरणयोः दैवयोगात् अर्हाः मोक्षकामाः तत्र [4]स्वसदृशि एकस्मिन् प्रवृत्य भवमूलोग्रकर्मापनोदे तु ईशाङ्घ्रिप्रपत्तिं मुक्त्वा परं किमपि साधनं न हीत्यतिष्ठन् इत्यन्वयः ॥ ८ ॥ ॥ १९ ॥

## उपायविभागाधिकारो नवमः ॥ ९ ॥

நின்ற நிலைக்குற நிற்குங் கருமமு நேர்மதியால்
நன்றென நாடிய ஞானமு நன்குமுட் கண்ணுடையார்
ஒன்றிய பத்தியு மொன்று மிலாவிரை வார்க்கருளால்
அன்று பயன்றரு மாறு மறிந்தவ ரந்தணரே. (கூ)

[5]कर्मोपायस्थितेश्चानुगुणमतिदृढायाश्च सूक्ष्मोपलब्ध्या
ज्ञानञ्चान्वेषितं साध्विति सततगृहीताश्च भक्तिं प्रियत्वात् ।
अन्तश्चक्षुर्भिरेतत्त्रितयविरहिणां सत्वराणां कृपातः
श्रीमद्दत्तेष्टमेव न्यसनमपि तदा [6]संविदन्तः श्रुतिज्ञाः ॥ २० ॥

अतिदृढाया उपायस्थितेरनुगुणं कर्म च, सूक्ष्मोपलब्ध्या साध्वित्यन्वेषितं ज्ञानञ्च, अन्तश्चक्षुर्भिः निरतिशयप्रियत्वात् सततगृहीतां भक्तिञ्च, एतत्त्रितयविरहिणां सत्वराणाञ्च तदैव कृपातः श्रीमद्दत्तेष्टं न्यसनमपि [7]संविदन्तः, इदं कर्तृवाचकम् , श्रुतिज्ञा इत्यन्वयः ॥ ९ ॥ ॥ २० ॥

## प्रपत्तियोग्याधिकारो दशमः ॥ १० ॥

அந்தண ரந்திய ரெல்லையி நின்ற வனைத்துலகும்
நொந்தவ ரேமுத லாக நுடங்கிய நன்னியராய்
வந்தடை யும்வகை வண்டக வேந்தி வருந்தியநம்
அந்தமி லாதியை யன்ப ரறிந்தறி வித்தனரே. (கஎ)

**विप्रा अन्त्याश्च मध्ये स्थितसकलनरोऽकिञ्चनाश्चार्तमुख्याः**
**[1]प्रत्यावृत्यार्थदैवान्तरत उपगता अप्रकम्प्यानुकम्पाम् ।**
**धृत्वा जीवावनार्थप्रयतनमपरिच्छेद्यमादिं यथास्म-**
**न्नाथं बुद्ध्वाप्नुयुर्नो गुरव इह तथाऽबोधयंस्तत्प्रकारम् ॥ २१ ॥**

[2]विप्रा [3]अन्त्या मध्ये स्थितसकल[4]नरश्च आर्तमुख्याः [5]अकिञ्चनास्तु अर्थदैवान्तरतः प्रत्यावृत्य [6]उपगताः अप्रकम्प्यानुकम्पां [7]धृत्वा जीवावनार्थप्रयतनं अपरिच्छेद्यमादिं अस्मन्नाथं यथा आप्नुयुः तथा गुरवः [8]बुद्ध्वा नः तत्प्रकारं अबोधयन्नित्यन्वयः । नर इति बहुवचनम् ॥ १० ॥ ॥ २१ ॥

## परिकरविभागाधिकार एकादशः ॥ ११ ॥

அறிவித் தனரன் பரையம் பரையுமு பாயமில்லாத்
துறவித் துணியிற் றுணையாம் பரனை வரிக்கும்வகை
உறவித் தனையின்றி யொத்தா ரெனநின்ற வும்பரைநாம்
பிறவித் துயர்செகு வீரென் றிரக்கும் பிழையறவே. (கஅ)

**सन्देहोत्पादकोपासनमुखविरहाकिञ्चनत्वोत्थदुःखा-**
**वस्थायां सत्सहायोत्तमवरण[9]विधां न[10]स्तथा प्राहुरार्याः ।**
**[11]सम्बन्धादीन्विनाऽस्मत्सदृशविधिमुखान् प्रत्यमर्त्यान् वयं नो**
**याच्ञां कुर्मो यथा नो व्यपनयत भवक्लेशमित्यत्यनर्हाम् ॥ २२ ॥**

[12]वयं शेषत्वादीन् विनाऽस्मत्सदृशविधिमुखान् अमर्त्यान् [13]प्रति यूयं नः भवक्लेशं व्यपनयतेति अत्यनर्हां याच्ञां यथा नो कुर्मः [14]तथा आर्याः [15]नः सन्देहोत्पादकोपासनमुखविरहाकिञ्चनत्वोत्थदुःखावस्थायां सत्सहायोत्तमवरण[8]विधां प्राहुरित्यन्वयः ॥ ११ ॥ २२ ॥

## साङ्गप्रपदनाधिकारो द्वादशः ॥ १२ ॥

அறவே பரமென் றடைக்கலம் வைத்தன ரன்றுநம்மைப்
பெறவே கருதிப் பெருந்தக வுற்ற பிரானடிக்கீழ்
உறவே யிவனுயிர் காக்கின்ற வோருயி ருண்மையைநீ
மறவே லெனநம் மறைமுடி சூடிய மன்னவரே. (கக)

**स्थेया मूर्धाभिषिक्तास्श्रुतिषु तु गुरवश्शेषभावादिनैत-**
**ज्जीवत्रातुस्समस्तात्मन इति च भवान्विस्मरेन्न स्वभावम् ।**
**प्राङ्नो मत्वैव लब्धुं समधिककरुणस्योपकर्तुः पदाधो-**
**[1]व्युच्छिन्नः स्याद्धि भारो न इति करुणया न्यक्षिपन् रक्ष्यवस्तु ॥२३॥**

श्रुतिषु मूर्धाभिषिक्ताः [2]स्थेयाः न गुरवः शेष[3]भावादिनैव एतज्जीवत्रातुस्समस्तात्मनः स्वभावं भवान् न विस्मेरत् [4]इति शिक्षयित्वा प्राक् नः लब्धुमेव मत्वा समधिककरुणस्य उपकर्तुः [5]पदाधः भारः व्युच्छिन्नः स्यादिति उद्दिश्य करुणया नः रक्ष्यवस्तु न्यक्षिपन् [6]इत्यन्वयः ॥ "शिक्षयित्वा" "उद्दिश्य" इति पदद्वयस्याध्याहारः ॥ १२ ॥ ॥ २३ ॥

## कृतकृत्याधिकारस्त्रयोदशः ॥ १३ ॥

மன்னவர் விண்ணவர் வாஞ்சே ரிறையொன்றும் வான்கருத்தோர்
அன்னவர் வேள்வி யனைத்து முடித்தன ரன்புடையார்க்
கென்ன வரந்தர வென்று நம்மத்தி கிரித்திருமால்
முன்னம் வருந்தி யடைக்கலங் கொண்டநம் முக்கியரே. (உ௰)

**दद्यां कं प्रेमभाजां मयि वरमिति नो हस्तिशैलस्थलक्ष्मी-**
**[7]व्यामुग्धेन प्रयस्य प्रथममथ भरत्वेन सम्यग्गृहीताः ।**
**[8]मुख्या नस्तु प्रपन्नाः कृतयजनशतास्[9]स्वामिनो नस्सुपूज्याः**
**देवाश्श्रीसूरिनाथास्पदपरमपदे [10]रागिणस्सद्विवेकाः ॥ २४ ॥**

[11]मयि प्रेमभाजां कं वरं दद्यामिति नः हस्तिशैलस्थलक्ष्मीव्यामुग्धेन प्रथमं सम्यक् प्रयस्य, अथ भरत्वेन [12]गृहीताः स्वीकृताः [13]नः मुख्याः प्रपन्नास्तु नः स्वामिनः सुपूज्या देवाः श्रीसूरिनाथास्पदपरमपदे रागिणः सद्विवेकाः कृतयजनशताश्चेत्यन्वयः ॥ १३ ॥ २४ ॥

## स्वनिष्ठाभिज्ञानाधिकारश्चतुर्दशः ॥ १४ ॥

முக்கிய மந்திரங் காட்டிய மூன்றி னிலையுடையார்
தக்கவை யன்றித் தகாதவை யொன்றுந் தமக்கிசையார்
இக்கரு மங்க ளெமக்குள வென்னு மிலக்கணத்தால்
மிக்க வுணர்த்தியர் மேதினி மேவிய விண்ணவரே. (உரு)

**मुख्येनाष्टाक्षरेण त्रिषु समधि[1]गता दर्शितेष्वेषु निष्ठां**
**कर्म स्वार्हं विना स्याननुगुणमखिलं निन्दितं सन्त्यजन्तः ।**
**स्वोपायार्थेषु निष्ठास्तदवगतिकरैस्स्वेषु सन्तीति लिङ्गै-**
**र्निश्चिन्वन्तः पृथिव्यां भगवदभिमते प्रीतिमत्सूरयो हि ॥ २५ ॥**

मुख्येनाष्टाक्षरेण [2]दर्शितेषु त्रिषु एषु [3]निष्ठां समधिगताः [4]स्वार्हं कर्म विना स्वाननुगुणमखिलं निन्दितं सन्त्यजन्तः स्वोपायार्थेषु [5]निष्ठाः तदवगतिकरैः लिङ्गैः स्वेषु सन्तीति निश्चिन्वन्तः पृथिव्यां भगवदभिमते प्रीतिमत्सूरयो [6]हीत्यन्वयः ॥ १४ ॥ २५ ॥

## उत्तरकृत्याधिकारः पञ्चदशः ॥ १५ ॥

விண்ணவர் வேண்டி விலக்கின்றி மேவு மடிமையெல்லாம்
மண்ணுல கத்தின் மகிழ்ந்தடை கின்றனர் வண்டுவரைக்
கண்ண னடைக்கலங் கொள்ளக் கடன்கள் கழற்றிய நம்
பண்ணம ருந்தமிழ் வேத மறிந்த பகவர்களே. (உஉ)

**रम्यायां द्वारकायां निवसदधिपति[7]स्वीकृतस्वात्मभारा**
**मुक्तास्त्रिभ्यो ऋ[ह्यृ]णेभ्यो द्रमिडनिगममौल्याशयज्ञाः प्रपन्नाः ।**
**श्रेष्ठास्सम्प्रार्थ्य सूरिप्रचितमनिशं प्रीतितस्सर्वदास्यं**
**भूलोकेऽस्मिन् पुमर्थं स्वयमतिमुदिता[8]श्चानुभूयाप्नुवन्ति ॥ २६ ॥**

[9]श्रेष्ठाः प्रपन्नाः सम्प्रार्थ्य [10]अनिशं प्रीतितः सूरिप्रचितं सर्वदास्यं अस्मिन् भूलोके स्वयं पुमर्थ[11]मनुभूय अतिमुदिताः [12]सन्त आप्नुवन्ती-त्यन्वयः ॥ १५ ॥ २६ ॥

## पुरुषार्थकाष्ठाधिकारष्षोडशः ॥ १६ ॥

வேத மறிந்த பகவர் வியக்க விளங்கியசீர்
நாதன் வகுத்த வகைபெரு நாமவ னல்லடியார்
காதர மிக்க வடிமை யிசைந்தழி யாமறைநூல்
நீதி நிறுத்த நிலேகுலே யாவகை நின்றனமே. (உகூ)

[1]वेदार्थज्ञाश्रिताश्चर्यकरसुविलसत्सद्गुणश्रीशक्लृप्तं
स्वीये शेषत्वमाप्ता वयमपकलुषाणां हि तस्याश्रितानाम् ।
अङ्गीकृत्यातिरागप्रचुरमभिमतं सद्गुणाधिक्यदृष्ट्या
कैङ्कर्यं नित्यवेदैर्नयविहितवृषालोपरीतौ स्थितास्स्मः ॥ २७ ॥

तस्याश्रितानां सद्गुणाधिक्यदृष्ट्या अतिरागप्रचुरं अभिमतं कैङ्कर्यं अङ्गीकृत्य नित्यवेदैर्नयविहितवृषालोपरीतौ स्थितास्स्म इत्यन्वयः ॥ १६ ॥ २७ ॥

## शास्त्रीयनियमनाधिकारस्सप्तदशः ॥ १७ ॥

நின்றன மன்புடை வானோர் நிலேயி னிலமளந்தான்
நன்றிது தீய திதென்று நடத்திய நான்மறையால்
இன்று நமக்கிர வாதலி லிம்மதி யிங்கிலவே
அன்றி யடிக்கடி யாரிரு ளேர்க்க வடியுளதே. (உச)

तिष्ठामः प्रेमवत्सूर्यनुगुणपरिचर्यास्थितौ लोकमात्रे-
त्येतत्साध्वेतदन्यत्प्रवचितनिगमैस्सेतिहासैश्चतुर्भिः ।
रात्रित्वात् [2]संसृतेर्नः क्षपयितुमसकृद्वर्धमानं तमिस्रं
वेदाब्जं किं तदादिं स्मृतिमपि च विना चन्द्रिकां हेतुरस्ति ॥ २८ ॥

लोकमात्रा एतत्साधु एतदन्यदिति सेतिहासैश्चतुर्भिः प्रवचितनिगमैः प्रेमवत्सूर्यनुगुणपरिचर्यास्थितौ तिष्ठामः [3]संसृतेः रात्रित्वात् *वेदाब्जं तदादिं स्मृतिं चन्द्रिकामपि च विना असकृत् प्रवर्धमानं तमिस्रं क्षपयितुं हेतुरस्ति किमित्यन्वयः ॥ १७ ॥ २८ ॥

## अपराधपरिहाराधिकारोऽष्टादशः ॥ १८ ॥

உளதான வல்வினைக் குள்ளம் வெருவி யுலகளந்த
வளர்தா மரையிணை வன்சர ணுக வரித்தவர்தாம்
களைதா னெனவெழுங் கன்மங் துறப்பர் துறந்திடிலும்
இளைதா நிலைசெக வெங்கள் பிரானருட் டேனெழுமே. (உரு)

तिष्ठद्दुर्वारधीपूर्वकदुरितसमारम्भकारब्धपापात्
भीत्या मातुर्जगत्याः पदकमलयुगञ्चानुतप्ता उपायम् ।
गाढं प्राप्ता न चक्रुर्यवसवदुदयत्कर्म तद्वर्जनेऽपि
श्रीशस्यैवानुकम्पा मधुन उपकृतो धीमृदुत्वापनोदि ॥ २९ ॥

पापात् भीत्या अनुतप्ताः जगत्या मातुः पदकमलयुगं गाढं उपायं प्राप्ताः यवसवदुदयत्कर्म न चक्रुः । तद्वर्जऽनेपि उपकृतश्श्रीशस्यैव अनुकम्पा मधुनः धीमृदुत्वापनोदीत्यन्वयः ॥ १८ ॥ २९ ॥

## स्थानविशेषाधिकार एकोनविंशः ॥ १९ ॥

தேனார் கமலத் திருமக ளுதன் றிகழ்ந்துறையும்
வானா டுகந்தவர் வையத் திருப்பிடம் வன்றருமக்
கானா ரிமயமுங் கங்கையுங் காவிரி யுங்கடலும்
நானா நகரமு நாகமுங் கூடிய நன்னிலமே. (உசு)

मध्वापूर्णाब्ज[1]वासिन्यधिपविलसितावासवैकुण्ठकामा-
वासो लोके निवृत्त्यात्मकवृषगहनैस्संवृतश्श्रीहिमाद्रिः ।
गङ्गा सह्याद्रिकन्या जलनिधिरपि साकेतपूर्वाः पुरश्च
श्रीवैकुण्ठश्च सर्वं मिलितमिदमपि श्लाघ्यवासस्थलं हि ॥ ३० ॥

यथा[2]क्रममन्वयः ॥ १९ ॥ ३० ॥

## निर्याणाधिकारो विंशः ॥ २० ॥

நன்னில மாமது நற்பக லாமது நன்னிமித்தம்
என்னலு மாமதி யாதானு மாமங் கடியவர்க்கு
மின்னிலை மேனி விடும்பய ணத்து விலக்கிலதோர்
நன்னிலை யாநடு நாடி வழிக்கு நடைபெறவே. (உஎ)

दासानां विघ्नशून्ये त्वसदृशि [1]च शुभे मध्यनाडीमुखेऽर्चि-
मार्गे सञ्चारहेतोः *क्षणिकरुचिसदृग्देहमुक्तिप्रयाणे ।
देशः कालो निमित्तं त्रितयमनियतत्वादिदं साध्वसाधु
प्राप्तं यद्यत्तदेतत् त्रितयमपि शुभं रङ्गनाथाङ्घ्रिभाजाम् ॥ ३१ ॥

[2]अन्वयस्सुकरः ॥ २० ॥ ३१ ॥

## गतिविशेषाधिकार एकविंशः ॥ २१ ॥

நடைபெற வங்கிப் பகலொளி நாளுத்த ராயணமாண்
டிடைவரு காற்றிர வியிர வின்பதி மின்வருணன்
குடையுடை வானவர் கோமான் பிரசாபதி யென்றிவரால்
இடையிடை போகங்க ளெய்தி யெழிற்பத மேறுவரே. (உஅ)

अर्चिर्वासरपूर्वपक्षषडुदङ्मासाब्द[3]मध्यापत-
च्चार्यार्केन्दुतटिज्जलेशधवलच्छत्रस्वरीशा विधिः ।
इत्येतैस्समये गतेस्सुविपुलं मध्ये च मध्ये सुखं
सम्प्राप्याथ लसत्पदानि यदि वा वैकुण्ठमारोहति ॥ ३२ ॥

[4]प्रपन्न इति शेषः । गतेस्समये इत्येतैर्मध्ये मध्ये च सुविपुलं सुखं प्राप्य लसत् पदानि आरोहति, यदि वा वैकुण्ठमारोहतीत्यन्वयः ॥ २१ ॥ ३२ ॥

## परिपूर्णब्रह्मानुभवाधिकारो द्वाविंशः ॥ २२ ॥

ஏறி எழிற்பத மெல்லா வுயிர்க்கு மிதமுகக்கும்
நாறு துழாய்முடி நாதனை நண்ணி யடிமையினம்
கூறு கவர்ந்து குருக்கள் குழாங்கள் குரைகழற்கீழ்
மாறுத லின்றி மகிழ்ந்தெழும் போகத்து மன்னுவமே. (உகூ)

भास्वद्वैकुण्ठ[5]माप्त्वा सकलतनुभृतां व्याजतः प्रीतियुक्तं
सद्गन्धश्रीतुलस्यान्वितशिरसमुपेत्यैष नोऽशस्तु दास्ये ।
एतेषां स्यादितीच्छद्गुरुततिकटकध्यानवत्पादमूले
भूयोऽप्यावृत्तिशून्यं विलसदतिसुखे प्रीतियुक्तास्स्थिताः स्मः ॥ ३३ ॥

[1]अन्वयस्सुकरः । शिरसमित्यनन्तरं नाथ इति शेषः ॥ २२ ॥ ३३ ॥

॥ इति श्रीमद्रहस्यत्रयसारे अर्थानुशासनभागः प्रथमः ॥

## सिद्धोपायशोधनाधिकारस्त्रयोविंशः ॥ २३ ॥

மன்னு மனைத்துற வாய்மருண் மாற்றரு ளாழியுமாய்த்
தன்னினை வாலனைத் துந்தரித் தோங்குந் தனியிறையாய்
இன்னமு தத்தமு தாலிரங் குந்திரு நாரணனே
மன்னி யவன்சரண் மற்றோர் பற்றின்றி வரிப்பவர்க்கே. (௩௰)

**दृढतरसर्वबन्धुरमतिप्रदयाम्बुनिधि-**
**स्स्वमतिधृताखिलो विपुलबृद्धि[2]रतुलपतिः**
**अतिमधुरामृतोदयरमासुघृणस्तदिनो**
**गतगति पूर्वसिद्धदृढसाधनमङ्घ्रिजुषाम् ॥ ३४ ॥**

तदिनः गतगति यथा तथा अङ्घ्रिजुषां पूर्वसिद्धदृढसाधनमित्यन्वयः ॥ २३ ॥ ३४ ॥

## साध्योपायशोधनाधिकारश्चतुर्विंशः ॥ २४ ॥

வரிக்கின்ற நன்பரன் யாவரை யென்னு மறையதனில்
விரிக்கின்ற துங்குறி யொன்றால் வினையரை யாதலினும்
உரைக்கின்ற நன்னெறி யோரும் படிகளி லோர்ந்துலகம்
தரிக்கின்ற தாரக ஞர்தக வாற்றரிக் கின்றனமே (௩௧)

**श्रीमान् सर्वोत्तमोऽयं प्रवृणुत इति यद्वेदविस्तारितं तत्**
**कर्मस्रोतस्वकोपप्रविषयवरणं व्याजतोऽतो वयं तु ।**
**ज्ञात्वा शास्त्रोक्तभक्तिप्रपदनसरणी व्याजशास्त्रोक्तरीत्या**
**लोकानां धारकोज्जीवकहरिकृपयोज्जीविताश्चाभवाम ॥ ३५ ॥**

व्याजशास्त्रोक्तरीत्या शास्त्रोक्तभक्ति([3]प्रपत्ति)प्रपदनसरणी ज्ञात्वा लोकानां धारकोज्जीवकहरिकृपया उज्जीविता अभवामेत्यन्वयः ॥ २४ ॥ ३५ ॥

## प्रभावव्यवस्थाधिकारः पञ्चविंशः ॥ २५ ॥

தகவாற் றரிக்கின்ற தன்னடி யார்களைத் தன்றிறத்தில்
மிகவாத ரஞ்செய்யு மெய்யருள் வித்தகன் மெய்யுரையின்
அகவா யறிந்த வாரண நீதி நெறிகுலைதல்
உகவா ரெனவெங்க டேசிக ருண்மை யுரைத்தனரே. (௩௨)

कारुण्यात्स्वस्य दासान् तनुधरणकृतः स्वस्वभावप्रदाना-
दत्याहत्यान्त्यवाक्यन्त्व[1]वितथकरुणस्याद्भुताचारविष्णोः ।
सार्थं पूर्वे विदन्तश्श्रुति[2]शिखरनयस्याध्वभङ्गं न चाङ्गी-
चक्रुर्हीत्यस्मदार्या उपदिदिशुरिदं त्वर्थतत्त्वं यथा(व)त् ॥ ३६ ॥

कारुण्यात् तनुधरणकृतः स्वस्य दासान् स्वस्वभावप्रदानात् [3]अत्याहत्या अवितथकरुणस्य अद्भुताचारविष्णोः अन्त्यवाक्यं सार्थं विदन्तः पूर्वे श्रुति[4]शिखरनयस्याध्वभङ्गं [5]नैवाङ्गीचक्रुरिति अस्मदार्याः इदं अर्थतत्त्वं यथावदुपदिदिशुर्हीत्यन्वयः ॥ २५ ॥ ३६ ॥

## प्रभावरक्षाधिकारः षड्विंशः ॥ २६ ॥

உண்மை யுரைக்கு மறைகளி லோங்கிய வுத்தமனூர்
வண்மை யளப்பரி தாதலின் வந்து கழல்பணிவார்
தண்மை கிடந்திடத் தரமள வென்ன வியப்பிலதாம்
உண்மை யுரைத்தன ரோரந் தவிர வுயர்ந்தனரே. (௩௩)

सत्योक्तिष्वागमान्तेष्वभिहितपुरुषश्रेष्ठमाहात्म्यमीष-
न्निष्कष्टुं नैव शक्यन्त्वगतिकमत आगत्य पादाश्रितानाम् ।
जात्याद्यैर्नैच्यसत्त्वेऽप्यतिमित इति वाक्शून्य एतत्प्रभाव-
स्स्यादित्याचार्यवर्या उपदिदिशुरिमं पक्षपातं विनार्थम् ॥ ३७ ॥

[6]सत्येत्यादि । अतः अगतिकं यथा तथा आगत्य पादान् आश्रितानां जात्याद्यैर्नैच्यसत्त्वेऽपि एतत्प्रभावः अतिमित इति वाक्छून्यस्स्यादिति आचार्यवर्याः पक्षपातं विना इममर्थमुपदिदिशुरित्यन्वयः ॥ २६ ॥ ३७ ॥

॥ इति श्रीमद्रहस्यत्रयसारे स्थिरीकरणभागो द्वितीयः ॥

## मूलमन्त्राधिकारस्सप्तविंशः ॥ २७ ॥

உயர்ந்தநங் காவல னல்லார்க் குரிமை துறந்துயிராய்
மயர்ந்தமை தீர்ந்து மற்ருேர் வழியின்றி யடைக்கலமாய்ப்
பயந்தவந் நாரணன் பாதங்கள் சேர்ந்த பழவடியார்
நயந்தகுற் றேவலெல் லாநாடு நன்மனு வோதினமே. (௩௪)

**उत्कृष्टादन्यदास्यन्त्ववनकृत उदस्यैव देहादिभिन्ना-**
**स्त्यक्ताज्ञाना उपायान्तररहिततया तद्भरत्वेन दत्ताः ।**
**लोकानां स्रष्टृनारायणचरणमथाश्रित्य सूरिप्रक्लृप्तं**
**सर्वं दास्यं वदन्तं [1]सुमनुमिह गुरोरन्तिकादभ्यसेम ॥ ३८ ॥**

अन्वयस्सुकरः ॥ २७ ॥ ३८ ॥

## द्वयाधिकारोऽष्टाविंशः ॥ २८ ॥

ஓது மிரண்டை யிசைந்தரு ளாலுத வுந்திருமால்
பாத மிரண்டுஞ் சரணெனப் பற்றிநம் பங்கயத்தாள்
நாதனை நண்ணி நலந்திகழ் நாட்டி லடிமையெலாம்
கோதி லுணர்த்தி யுடன்கொள்ளு மாறு குறித்தனமே. (௩௫)

**त्रय्यन्तोक्तं मिलित्वोच्चरत सकृदिति द्वन्द्वमन्त्रं कृपातो**
**वक्तुश्श्रीशस्य पादौ [2]दृढशरणमुपेत्याब्जवासीन्दिरायाः ।**
**नाथं नः प्राप्य मोदप्रचुरतमपदे कृत्स्नकैङ्कर्यमुज्झ-**
**द्दोषं प्राप्तुं सुपूर्णानुभवपरिगतं तत्प्रकारन्तु विद्मः ॥ ३९ ॥**

त्रय्यन्तोक्तं द्वन्द्वमन्त्रं मिलित्वा सकृदुच्चरत इति कृपातः वक्तुः श्रीशस्य पादौ [3]दृढशरणमुपेत्य नः अब्जवासीन्दिरायाः [4]नाथं मोदप्रचुरतमपदे प्राप्य उज्झद्दोषं सुपूर्णानुभवपरिगतं कृत्स्नकैङ्कर्यं प्राप्तुं तत्प्रकारं तु विद्म इत्यन्वयः ॥ २८ ॥ ३९ ॥

## चरमश्लोकाधिकार एकोनत्रिंशः ॥ २९ ॥

குறிப்புடன் மேவுந் தருமங்க ளின்றியக் கோவலனுர்
வெறித்துள வக்கழல் மெய்யர ணென்று விரைந்தடைந்து
பிறித்த வினைத்திரள் பின்றுட ராவகை யப்பெரியோர்
மறிப்புடை மன்னருள் வாசகத் தான்மரு ளற்றனமே. (௩௬)

कर्मादीन् सावधानं रचयितुमुचितांस्तान्विना गोपविष्णो-
स्सद्गन्धश्रीतुलस्यन्वितचरणयुगं सत्यमित्यध्यवस्य ।
आश्रित्योपायमंहोऽखिलमननुगतं संविभक्तं विधाय
प्रख्यात[1]श्रीशसर्वावरणदृढकृपाश्लोकतोऽज्ञानशून्याः ॥ ४० ॥

[2]अभूम इति शेषः । सावधानं यथा तथा रचयितुमुचितान् तान् कर्मादीन् विना गोपविष्णोः सद्गन्धश्रीतुलस्यन्वितचरणयुगं सत्यमुपायमित्यध्यवस्य आश्रित्य संविभक्तं अखिलं अंहः अननुगतं प्रख्यात[3]श्रीशसर्वावरणदृढकृपाश्लोकतः [4]वयं अज्ञानशून्या अभूमेत्यन्वयः ॥ २९ ॥ ४० ॥

॥ इति श्रीमद्रहस्यत्रयसारे पदवाक्ययोजनाभागस्तृतीयः ॥

## आचार्यकृत्याधिकारस्त्रिंशः ॥ ३० ॥

மருளற்ற தேசிகர் வானுகப் பாலிந்த வையமெல்லாம்
இருளற் றிறையவ னிணையடி பூண்டிட வெண்ணுதலால்
தெருளுற்ற செந்தொழிற் செல்வம் பெருகிச் சிறந்தவர்பால்
அருளுற்ற சிந்தையி னுலழி யாவிளக் கேற்றினரே. (௩௭)

वीताज्ञानास्सदार्याः परमपदगतौ रागतोऽत्रत्यलोका-
स्सर्वेऽज्ञानं विमुच्येश्वरचरणयुगं प्राप्नुयुश्चेति मत्वा ।
कारुण्याश्लिष्ट[5]चित्ताः [6]स्वमतियुतरमानाथकैङ्कर्यसम्प-
त्पूर्णप्रख्यातशिष्ये क्षयरहितमहादीपमारोपयन् हि ॥ ४१ ॥

[7]अन्वयस्सुकरः ॥ ३० ॥ ४१ ॥

## शिष्यकृत्याधिकार एकत्रिंशः ॥ ३१ ॥

ஏற்றி மனத்தெழின் ஞான விளக்கை யிருளனைத்தும்
மாற்றி னவர்க்கொரு கைம்மாறு மாயனுங் காணகில்லான்
போற்றி யுகப்பதும் புந்தியிற் கொள்வதும் பொங்குபுகழ்ச்
சாற்றி வளர்ப்பதுஞ் சற்றல்லவோ முன்னம் பெற்றதற்கே. (௩௮)

आरोप्यान्तेवसच्चेतसि विलसितधीदीपमेकां तमिस्रं
नाज्ञानं निघ्नतां प्रत्युपकृतिमखिलं चित्रचेष्टोऽप्यपश्यत् ।
स्तुत्वा तोषश्च बुद्धौ स्मरणमविरतं वर्धमानान् गुणांश्चा-
प्युद्घुष्य ख्यापनं नः प्रथममधि[8]गतस्यैतदीषन्न सर्वम् ॥ ४२ ॥

अन्तेवसच्चेतसि विलसितधीदीपं आरोप्य अखिलं अज्ञानं तमिस्रं [1]निघ्नतां एकां प्रत्युपकृतिं चित्रचेष्टोऽपि नापश्यत् । स्तुत्वा तोषश्च बुद्धौ अविरतं स्मरणञ्च वर्धमानान् गुणानुद्घुष्य ख्यापनमपि प्रथमं नः अधिगतस्य एतत् [2]सर्वमीषन्न इत्यन्वयः ॥ ३१ ॥ ४२ ॥

## निगमनाधिकारो द्वात्रिंशः ॥ ३२ ॥

முன்பெற்ற ஞானமு மோகந் துறக்கலு மூன்றுரையில்
தன்பற்ற தன்மையுந் தாழ்ந்தவர்க் கீயுந் தனித்தகவும்
மன்பற்றி நின்ற வகையுரைக் கின்ற மறையவர்பால்
சின்பற்றி யென்பயன் சீரறி வோர்க்கிவை செப்பினமே. (௩௯)

[प्रागाचार्या]प्रधीश्च श्रमशमनमपि श्रीरहस्य[3]त्रयोक्त-
स्व....ज्ञत्स्वभावोऽप्यग[तिकविषये दीयमाना]कृपा च ।
आश्रित्योपायमीशं स्थितिरिदमखिलं बोधयद्वैदिकेषु
क्रोधं कृत्वा फलं किं [4]गुणरसिक(सदा)[सतां](म)[प्र]ब्रवामार्थमेतम्
॥ ४३ ॥

[5]अन्वयस्सुकरः ॥ ३२ ॥ ४३ ॥

செப்பச் செவிக்கமு தென்னத் திகழுஞ் செழுங்குணத்துத்
தப்பற் றவருக்குத் தாமே யுகந்து தருந்தகவால்
ஒப்பற்ற நான்மறை யுள்ளக் கருத்தி லுரைத்துரைத்த
முப்பத் திரண்டிவை முத்தமிழ் சேர்ந்த மொழித்திருவே. (௪0)

[श्रोत्रे]षूच्चारणे सत्यमृतमिव लसन्त्यश्च [6]शान्त्यन्वितानां
शिष्याणां [7]निर्मलानां स्वयमतिमुदितश्रीशसाधर्म्य[8]दाद्धि ।
कारुण्यान्निस्समानश्रुति[9]हृदयधियेऽभ्यस्य सूक्ता द्वियुक्त-
त्रिंशत्संख्यास्त्रिलक्ष्मद्रमिडयुतवचश्श्रीकरा अन्तगाथाः ॥ ४४ ॥

[10]शान्त्याद्यन्वितानां निर्मलानां शिष्याणां [श्रुतिहृदयधिये स्वयमति[11]मुदित] श्रीश[12]साधर्म्यदाद्धि कारुण्यात् अभ्यस्य [सूक्ताः] उच्चारणे सति [श्रोत्रेषु अमृ]तमिव लसन्त्यः[द्वियुक्त]त्रिंशत्सङ्ख्याः अन्तगाथाः त्रिलक्ष्मद्रमिड[युत]वचश्श्रीकरा इत्यन्वयः ॥ ३२ ॥ ४४ ॥

तत्त्वत्रयचिन्तनाधिकारे (५)

புருடன்மணி வரமாகப் பொன்ரு மூலப்
பிரகிருதி மறுவாக மான்றண் டாகத்
தெருண்மருள்வாண் மறைவாக வாங்கா ரங்கள்
சார்ங்கஞ்சங் காகமனந் திகிரி யாக
இருடீகங்க ளீரைந்துஞ் சரங்க ளாக
விருபூத மாலைவன மாலை யாகக்
கருடனுரு வாமறையின் பொருளாங் கண்ணன்
கரிகிரிமே னின்றனைத்துங் காக்கின் ருனே. (௪௫)

**श्रीवत्सोऽनाशिमूलप्रकृति[रिति]पुमान् कौस्तुभश्चासिकोशौ**
**ज्ञानाज्ञाने गदा स्यान्महदपि च धनुः कम्ब्वहङ्कारयुग्मम् ।**
**चित्तं चक्रं शराश्चेन्द्रियदशकमुभौ भूतवर्गौ च माला**
**तार्क्ष्यस्याङ्गागमार्थः करिगिरिनिलयः पाति कृत्स्नं हि कृष्णः ॥ ४५ ॥**

पुमान् कौस्तुभः श्रीवत्सः अनाशिमूल[1]प्रकृतिः गदा महत्तत्त्वं असिकोशौ ज्ञानाज्ञाने धनुः कम्बु च तामसाहङ्कारस्सात्त्विकाहङ्कारश्च चक्रं चित्तं शरा इन्द्रियदशकं माला च उभौ भूतवर्गौ इति तार्क्ष्यस्याङ्गागमार्थः करिगिरिनिलयः कृष्णः कृत्स्नं पाति हीत्यन्वयः ॥ (५) (१) ॥ ४५ ॥

स्थानविशेषाधिकारे (१९)

ஆராத வருளமுதம் பொதிந்த கோயி
லம்புயத்தோ னயோத்திமன்னர்க் களித்த கோயில்
தோராத தனிவீரன் றொழுத கோயிற்
றுணையான வீடணற்குத் துணையாங் கோயில்
சேராத பயனெல்லாஞ் சேர்க்குங் கோயில்
செழுமறையின் முதலெழுத்துச் சேர்ந்த கோயில்
தீராத வினையனைத்துந் தீர்க்குங் கோயில்
திருவரங்க மெனத்திகழுங் கோயிற் ருனே. (௪௬)

**पर्याप्तिशून्यकरुणामृतपूर्णरङ्गमिक्ष्वाकवे सरसिजासनदत्तरङ्गम् ।**
**युद्धाजितासमनृवीरकृतेज्यरङ्गं रामाजिसाधकविभीषणगोप्तृ रङ्गम् ॥ ४६ ॥**

[1]अन्येष्वलभ्यसकलेप्सितदायि रङ्गं श्लाघ्यत्रयीप्रथमवर्णसरूपरङ्गम् ।
अन्यैरनाश्यसकलाघविनाशि रङ्गं श्रीरङ्गमित्यभिलसत्सुविमानमेव ॥४७॥

श्लोकद्वयस्यापि [2]क्रमेण एकान्वयः ॥ (१९) (२) (३) ॥ ४७ ॥

கண்ணனடி யிணையெமக்குக் காட்டும் வெற்புக்
கடுவினைய ரிருவினையுங் கடியும் வெற்புத்
திண்ணமிது வீடென்னத் திகழும் வெற்புத்
தெளிந்தபெருந் தீர்த்தங்கள் செறிந்த வெற்புப்
புண்ணியத்தின் புகலிதென்னப் புகழும் வெற்புப்
பொன்னுலகிற் போகமெல்லாம் புணர்க்கும் வெற்பு
விண்ணவரு மண்ணவரும் விரும்பும் வெற்பு
வேங்கடவெற் பெனவிளங்கும் வேத வெற்பே. (௪௩)

श्रीवासाभिधकृष्णपादयुगलं सन्दर्शयन्नो गिरिः
सुक्रूराघकृतां वृषाघयुगलात्माघप्रणाशी गिरिः ।
[मोक्षस्सत्य]मयन्त्विति प्रगदितुं योग्यप्रदीप्तिर्गिरिः
स्वच्छैः पाप[विनाशिनीमुखमहातीर्थैस्सम]द्धो गिरिः ॥ ४८ ॥

पुण्यस्थानमयन्त्विति प्रगदितुं योग्यप्रशंसो गिरि-
र्भास्वन्नित्यविभू[तिसिद्धमखिलं भो]गं प्रयच्छन् गिरिः ।
[3]वास्तव्यैर्भृशमादृतः परमखे भूमौ च देवैर्गिरिः
श्रीमद्वेङ्कटशैल इत्यभिलसन् वेदोदितोऽयं गिरिः ॥ ४९ ॥

श्लोकद्वयस्यापि [4]क्रमेण एकान्वयः ॥ (१९) (४) (५) ॥ ४९ ॥

உத்தம வமர்த்தல மமைத்த[5]தோ
ரெழிற்றனு வுயர்த்த கணையால்
அத்திர வரக்கன்முடி பத்துமொரு
கொத்தென வுதிர்த்த திறலோன்
மத்துறு மிகுத்ததயிர் மொய்த்த
வெணெய் வைத்ததுணு மத்தனிடமா
மத்திகிரி பத்தர்வினை தொத்தற
வறுக்குமணி யத்தி கிரியே. (௪௪)

[1]उत्कृष्टाजिस्थलार्हासदृशसुविलसच्चापसन्धीयमान-
श्रीबाणेनास्त्रिरक्षःकदशकनिकरा(धः)पातने शक्तिभाजः
मन्थानोन्मथ्यमानप्रचुरदधिजमातास्यदत्तामृताशि-
श्रीकृष्णाप्तस्य वासः करिगिरि[2]रघभित्तच्छ्रितस्यारिभूषा ॥ ५० ॥

करिगिरिः श्रितस्य अघभित् तत् अरिभूषेत्यन्वयः ॥ (१९) (६) ५० ॥

मूलमन्त्राधिकारे (२७)

எட்டுமா மூர்த்தியெண் கண்ணனெண்டிக்
கெட்டிறை யெண்பிர கிருதி
எட்டுமா வரைகளீன்ற வெண்குணத்தோ
னெட்டெணு மெண்குண மதியோர்க்
கெட்டுமாமல ரெண்சித்தி யெண்பத்தி
யெட்டுயோ காங்கமெண் செல்வம்
எட்டுமாகுண மெட்டெட் டெணுங்கலை
யெட்டிரத மேலதுவு மெட்டினவே. (௪௫)

अष्टाङ्गोऽष्टदृगष्टदिक् तदधिपाश्चाष्टौ प्रकृत्यद्रय-
श्चैतान्यष्टगुणस्य तानि सृजतश्चाष्टाक्षरं श्रीपतेः ।
सार्थं चिन्तयतां तथाष्टगुणधीभाजामहिंसादिका-
न्यष्टौ तानि सुमानि सिद्धय इमाश्चाष्टौ तथोहादयः ॥ ५१ ॥

भक्तिश्चाष्टविधा च भक्तजनवात्सल्यादिकाष्टौ तथा
योगाङ्गानि यमादिकानि विभवाश्चाष्टावणुत्वादयः ।
अष्टौ ते तु महागुणा अपि चतुष्षष्टिः कलाश्शान्तिर-
प्येतेष्वष्टरसोपरि स्थितिमती सर्वेषु किं दुर्लभम् ॥ ५२ ॥

प्रकृत्यद्रयः प्रकृतयः अद्रयश्च [3]अष्टाविति योज्यम् । तान्येतानि सृजतः अष्टगुणस्य श्रीपतेः अष्टाक्षरं सार्थं चिन्तयतां अष्टगुणधी[4]भाजां अहिंसादिकानि अष्टौ तानि सुमानि ऊहादय अष्टौ इमास्सिद्धयश्च भक्तजनवात्सल्यादिका अष्ट-विधा भक्तिश्च यमादिकानि अष्टौ योगाङ्गानि च अणुत्वादयः अष्टौ विभवाश्च

अष्टौ ते महागुणाश्च चतुष्षष्टिः कला अपि अष्टरसोपरि स्थितिमती शान्ति[1]रपि एतेषु सर्वेषु किं दुर्लभ[2]मिति श्लोकद्वयस्याप्येकान्वयः ॥ (२७) (७) (८) ॥ ५२ ॥

चरमश्लोकाधिकारे (२९)

ஒண்டொடியாள் திருமகளுந் தானு மாகி
யொருநினைவா லீன்றவுயி ரெல்லா முய்ய
வண்டுவரை நகர்வாழ வசுதே வர்க்காய்
மன்னவர்க்குத் தேர்ப்பாக ளுகி நின்ற
தண்டுளவ மலர்மார்பன் ருனே சொன்ன
தனித்தருமந் தானெமக்காய்த் தன்னை யென்றுங்
கண்டுகளித் தடிசூட விலக்காய் நின்ற
கண்புதையல் விளையாட்டைக் கழிக்கின் ருனே. (௨௯)

सुरम्यकरभूषया कमलया सह स्वेन तु
प्रसृष्ट[3]सकलात्मजीवननिमित्तमेकेच्छया ।
उदेत्य वसुदेवतो रुचिरभास्वरद्वारका-
पुरस्थजन(ऋ)[वृ]द्धये क्षितिपपार्थसारथ्यकृत् ॥ ५३ ॥

तुषारतुलसीसुमोल्लसदुरास्स्वयं व्याहृतं
स्वमात्तभरमद्वयं स्वयमुपायमुद्वीक्ष्य नः ।
सदा मुदधिकाङ्घ्रिसंवहनपूर्वदास्यार्गलां
विवेकनयनापिधानभवकेलिमत्यक्षिपत् ॥ ५४ ॥

[4]रुचिरभास्वरद्वारकापुरस्थजन(ऋ)[वृ]द्धये वसुदेवत उदेत्य [5]क्षितिपपार्थसारथ्यकृत् तुषारतुलसीसुमोल्लसदुराः सुरम्यकरभूषया कमलया सह एकेच्छया स्वेन तु प्रसृष्टसकलात्मोज्जीवननिमित्तं स्वयं व्याहृतं [6]अद्वयं सिद्धोपायं स्वयं चात्तभरं स्वं सदा उद्वीक्ष्य[नः]मुदधिकाङ्घ्रिसंवहन[7]पूर्वदास्यार्गलां विवेकनयनापिधानभवकेलिमत्यक्षिपत् [8]इति श्लोकद्वयस्य एकान्वयः ॥ (२९) (९) (१०) ॥ ५४ ॥

மூண்டாலு மரியதனின் முயல வேண்டா
முன்னமதி லாசைதனை விடுகை திண்மை
வேண்டாது சரணநெறி வேறோர் கூட்டு
வேண்டிலய னத்திரம்போல் வெள்கி நிற்கும்

நீண்டாகு நிறைமதியோர் நெறியிற் கூடா
நின்றனிமை துணையாக வென்றன் பாதம்
பூண்டாலுன் பிழைகளெல்லாம் பொறுப்பே னென்ற
புண்ணியனுர் புகழனைத்தும் புகழு வோமே. (சஎ)

स्वाशक्ये प्राक् प्रवृत्तावपि भवतु न सा प्राग्वरं रागमुक्ति-
न्यासो नान्याङ्गकाङ्क्षी निजमतितदपेक्षेऽस्त्ववत्प्रच्युतस्स्यात् ।
स्रष्टुस्सम्पूर्णबुद्धेश्चिरसमयसमासाद्यभक्तावयुक्त-
स्त्वत्कार्पण्यं सहायं भृशमुपगतवान्मत्पदं श्वेद्भजेथाः ॥ ५५ ॥

त्वदीयाघानि सर्वाणि क्षमिष्य इति वादिनः ।
धर्मरूपस्य कृष्णस्य प्रशंसामोऽखिलान् गुणान् ॥ ५६ ॥

[1]श्लोकद्वयस्यापि अन्वयस्सुकरः । स्रष्टुः अस्त्ववत् ॥ (२९) (११) (१२) ॥ ५६ ॥

சாதனமு நற்பயனு நானே யாவன்
சாதகனு மென்வசமா யென்னைப் பற்றும்
சாதனமுஞ் சரண நெறியன் றுமக்குச்
சாதனங்க ளிங்கிலைக்கோ ரிடையி னில்லா
வேதனைசேர் வேறங்க மிதனில் வேண்டா
வேறெல்லா நிற்குநிலை நானே நிற்பன்
தூதனுமா நாதனுமா மென்னைப் பற்றிச்
சோகந்தீ ரெனவுரைத்தான் சூழ்கின் றனே. (சஅ)

भवेयमहमेव साधनमपि प्रकृष्टं फलं
तथैव मदधीन आश्रयति माञ्च तत्साधकः ।
न चैव शरणागतिर्भवति साधनं वस्तथा
भवेच्च शरणागतेस्सहकृतौ न भक्त्यादिकम् ॥ ५७ ॥

न चैव शरणागतौ [2]श्रमयुतैतदङ्गानि वा
समस्तवृषतत्तदिष्टफलसाधनत्वेऽप्यहम् ।
स्थितोऽस्मि [3]सुलभं हि मां पतिमुपेत्य मा त्वं शुचः
स्वयं त्विति वदन् [4]स नः परित आवृणो[5]न्माधवः ॥ ५८ ॥

[1]साधनं प्रकृष्टं फलमपि अहमेव भवेयम् । साधकश्च मदधीनः मां आश्रयति । शरणागतिः वः साधनं न भवति । भक्त्यादिकञ्च शरणागतेस्सहकृतौ न भवेत् । [2]शरणागतौ श्रमयुतैतदङ्गानि वा न चैवापेक्षितानि । समस्तवृषतत्तदिष्ट-फलसाधनत्वे[3]ऽप्यहं स्थितोऽस्मि । त्वं [4]सुलभं पतिं मामुपेत्य मा शुचः इति [5]वदन् [6]माधवः नः स्वयं परितः [7]आवृणोदिति श्लोकद्वयस्यापि एकान्वयः ॥ (२९) (१३) (१४) ॥ ५८ ॥

தன்னினைவில் விலக்கின்றித் தன்னை நண்ணார்
நினைவனைத்துந் தான்விளைத்தும் விலக்கு நாதன்
என்னினைவை யிப்பவத்தி லின்று மாற்றி
யிணையடிக்கீ ழடைக்கலமென் றென்னை வைத்து
முன்னினைவால் யான்முயன்ற வினையால் வந்த
முனிவயர்ந்து முத்திதர முன்னே தோன்றி
நன்னினைவா ஞமிசையுங் கால மின்றோ
நாளையோ வென்றுநகை செய்கின் றனே. (௫௯)

स्वसङ्कल्पे बाधं स्वमननुगतानामभिरुचिं
समस्तामुत्पाद्य स्वयमपनयन्मे [8]पतिरिमाम् ।
भवेऽद्याशां छित्त्वा स्वपदयुगलाधोभुवि तु मां
स्वरक्ष्यं न्यस्य प्राग्भ्रममदभिक्लृप्ताघजनिताम् ॥ ५९ ॥

प्रदण्डेच्छां त्यक्त्वा परमपददानाय विभवा-
द्यनन्ताकारेण प्रसभमवतीर्येह कृपया ।
समीचीनज्ञानान्मदभिलषितो वाद्य समयः
स्वदासाप्त्यै श्वो वेत्यतिरुचिरहासं वितनुते ॥ ६० ॥

[9]स्वसङ्कल्पे बाधं स्वमननुगतानां समस्तामभिरुचिं स्वयमुत्पाद्य अपनयन् पतिः कृपया [10]मे इमां भवे आशां अद्य छित्त्वा स्वपदयुगलाधोभुवि तु मां स्वरक्ष्यं न्यस्य प्राग्भ्रममदभिक्लृप्ताघजनितां प्रदण्डेच्छां त्यक्त्वा परमपददानाय विभवाद्यनन्ताकारेण [11]इह प्रसभमवतीर्य [12]समीचीनज्ञानात् स्वदासाप्त्यै मदभिलषितः समयः अद्य वा श्वो वेति अतिरुचिरहासं [13]वितनुत इति श्लोकद्वयस्याप्येकान्वयः ॥ (२९) (१५) (१६) ॥ ६० ॥

आचार्यकृत्याधिकारे (३०)

பாட்டுக் குரிய பழையவர் மூவரைப் பண்டொருகால்
மாட்டுக் கருடரு மாயன் மலிந்து வருந்துதலால்
நாட்டுக் கிருள்செக நான்மறை யந்தி நடைவிளங்க
வீட்டுக் கிடைக்கழிக் கேவெளி காட்டுமிம் மெய்விளக்கே. (௬௰)

सुगाथाभिस्स्तोतुं प्रभुमनुगुणान् सूरिजनुष-
स्सरोमु([1]ख्या)[न्या]दींस्त्रीन् क्वचन समये द्वापरयुगे ।
कृपाकर्त्रा चित्राचरितविभुना चेतनधने
समेत्य श्रीकृष्ण[2]क्षेत्रगृहदेहल्यां मितभुवि ॥ ६१ ॥

प्रकामं सम्मर्दश्रमकरणतो ध्यानसमये
समाविश्यान्तादित्रितय ऋतदीपस्तु जगताम् ।
तमश्शान्त्यै चोत्पादित इह चतुर्वेदमकुटी-
सुवेद्यन्यासादेस्सरणिमधिकं द्योतयति हि ॥ ६२ ॥

[3]चेतनधने कृपाकर्त्रा चित्राचरितविभुना द्वापरयुगे क्वचन समये मितभुवि श्रीकृष्णक्षेत्रगृहदेहल्यां सुगाथाभिः प्रभुं स्तोतुमनुगुणान् सूरिजनुषः सरोमुन्यादीन् [4]त्रीन् अदृश्येन समेत्य प्रकामं सम्मर्दश्रमकरणतः ध्यान[5]समये समाविश्य जगतः तमश्शान्त्यै उत्पादितः अन्तादित्रितय ऋतदीपस्तु चतुर्वेदमकुटीसुवेद्यन्यासादेः [6]सरणिमिह अधिकं द्योतयति [7]हीति श्लोकद्वयस्याप्येकान्वयः ॥ (३०) (१७) (१८) ॥ ६२ ॥

निगमनाधिकारे (३२)

உறுசகட முடையவொரு காலுற் றுணர்ந்தன
உடன்மருத மொடியவொரு போதிற் றவழ்ந்தன
உறிதடவு மளவிலுர லூடுற்று நின்றன
உறிநெறியோர் தருமன்விடு தூதுக் குகந்தன
மறநெறியர் முறியபிர தானத் துவந்தன
மலர்மகள்கை வருடமலர் போதிற் சிவந்தன
மறுபிறவி யறுமுனிவர் மாலுக் கிசைந்தன
மனுமுறையில் வருவதோர் விமானத் துறைந்தன

அறமுடைய விசயனமர் தேரிற் றிகழ்ந்தன
அடலுரக படமடிய வாடிக் கடிந்தன
அறுசமய மறிவரிய தானத் தமர்ந்தன
அணிகுருகை நகர்முனிவர் நாவுக் கமைந்தன
வெறியுடைய துளவமலர் வீறுக் கணிந்தன
விழுகரியோர் குமரனென மேவிச் சிறந்தன
விறலசுரர் படையடைய வீயத் துடர்ந்தன
விடலரிய பெரியபெரு மாள்மெய்ப் பதங்களே. (௫௧)

बलिष्ठशकटासुरत्रुटनयोग्यनिद्राकरौ
कदाचन मिथोऽन्वितार्जुनविभङ्गकृद्रिङ्खणौ ।
सुशिक्यकलना[1]दुलूखलसुमध्यबद्धौ स्थितौ
[2]स्वयोग्यपथधर्मजप्रहितदूत्यसन्तोषिणौ ॥ ६३ ॥

प्ररुष्टरिपुमर्दनोचितचरौ च बृन्दावने
रमाकरसुमर्शनाद्विकसिताम्बुजाच्चारुणौ ।
पुनर्जनिनिवृत्तिकाङ्क्षयृषिसुभक्तिसद्गोचरौ
मनोः कुलसमागतातुलविमाननित्यस्थितौ ॥ ६४ ॥

हरेश्श्रयणधर्मविद्विजयसद्रथे भास्वरौ
महाबलभुजङ्गदुष्फणविमर्दनोत्सारकौ ।
मतैरपि च षड्विधैर्दुरवबोधधाम्नि स्थितौ
कुभूषकुरुकेश[3]सद्रसनसूरिगीर्गोचरौ ॥ ६५ ॥

सम्यग्गन्धतुलस्युदीतकुसुमश्रैष्ठ्यस्य योग्यौ [4]पत-
न्नीलेङ्गाल[न्नीलाङ्गार]कुमारभावकरणे संरभ्य सुष्ठूज्ज्वलौ ।
शौर्योपेतसुरारिकृत्स्नपृतनानाशाय विद्रावकौ
ज्ञातॄणाञ्च सुदुस्त्यजौ सुमृदुलौ रङ्गेशपादावुभौ ॥ ६६ ॥

चतुर्णां [5]श्लोकानामपि यथाक्रममेकान्वयस्सुकरः ॥ (३२) (१९) (२०) (२१) (२२) ६६ ॥

மறையுரைக்கும் பொருளெல்லா மெய்யென் றோர்வார்
மன்னியகூர் மதியுடையார் வண்கு ணத்தில்
குறையுரைக்க நினைவில்லார் குருக்க டம்பாற்
கோதற்ற மனம்பெற்றார் கொள்வார் நன்மை
சிறைவளர்க்குஞ் சிலமாந்தர் சங்கே தத்தாற்
சிதையாத திண்மதியோர் [1]தெரிந்த தோரார்
பொறைநிலத்தின் மிகும்புனிதர் காட்டு மெங்கள்
பொன்றாத நன்னெறியிற் புகுது வாரே. (௩௨)

सत्यं वेदोक्तमर्थं सकलमपि पुमान् विश्वसन् सूक्ष्मबुद्धि-
[2]दोषोक्तौ सद्गुणेषु त्वभिरुचिरहितस्सद्गुरोर्भ्रान्तिशून्यम् ।
ज्ञानं प्राप्तोऽसदङ्गीकरणकृदपि संसारवृद्ध्यङ्कुराणां
केषाञ्चिद्धीमितानामचलदृढमतिर्दुष्टसङ्केत[3]जल्पैः ॥ ६७ ॥

[4]विरागः क्षुद्रेऽर्थे निरतिशय आशामुपगतो
विविच्यासत्सद्वेत्यथ सदुपगन्तेदृशगुणः ।
क्षमासीमाभूमावधिकपरिशुद्धेन गुरुणा
विनिर्दिष्टे मार्गे हतिविरहिते नस्सति विशेत् ॥ ६८ ॥

वेदोक्तं सकलं [5]अर्थमपि सत्यं विश्वसन् सूक्ष्मबुद्धिः [6]सद्गुणेषु दोषोक्तौ तु अभिरुचिरहितः भ्रान्तिशून्यं ज्ञानं सद्गुरोः प्राप्तः असदङ्गीकरणकृदपि संसारवृद्ध्यङ्कुराणां धीमितानां केषाञ्चित् दुष्टसङ्केतजल्पैः [7]अचलदृढमतिः सद्वा असद्वा इति विविच्य सदुपगन्ता ईदृशगुणः पुमान् क्षमासीमाभूमावधिकपरिशुद्धेन गुरुणा विनिर्दिष्टे नः हतिविरहिते सति मार्गे [8]विशेदिति श्लोकद्वयस्यापि एकान्वयः ॥ (३२) (२३) (२४) ६८ ॥

இதுவழி யின்னமு தென்றவ ரின்புலன் வேறிடுவார்
இதுவழி யாமல வென்றறி வாரெங்க டேசிகரே
இதுவழி யெய்துக வென்றுகப் பாலென் பிழைபொறுப்பார்
இதுவழி யாமறை யோரரு ளால்யா மிசைந்தனமே. (௩௩)

एतद्ग्रन्थार्थ एव ह्यतिमधुरसदध्वेति चोचुर्न आर्याः
• शब्दादेरल्पसाराद्विषयत इह नो मोचयन् [1]श्रीधरस्य ।
कारुण्यं मुक्त्युपायो न परमिति विदुर्मुख्यमध्वैष दीर्घ-
[2]स्स्यादित्यालोच्य चैतत् प्रवचनजनिताद्भूरिसन्तोषतस्ते ॥ ६९ ॥

स्खलनानि क्षमेरन्नो वैदिकार्यानुकम्पया ।
एतद्ग्रन्थोक्त एवाध्वेत्यङ्गीकुर्मो वयं महान् ॥ ७० ॥

नः आर्या एतद्ग्रन्थार्थ एव [3]अतिमधुरसदध्वेति ऊचुः । अल्पसाराच्छब्दादेर्विषयतः इह नः [4]अमोचयन् । श्रीधरस्य कारुण्यं मुक्त्युपायः, परं [5]मुख्यं साधनं नेति विदुः, एषोऽध्वा दीर्घः स्यादिति आलोच्य एतत्प्रवचनजनितात् भूरिसन्तोषतः [6]नः स्खलनानि [7]क्षमेरंश्च, वयं वैदिकार्यानुकम्पया एतद्ग्रन्थोक्त एव महान् अध्वेति अङ्गीकुर्म [8]इति श्लोकद्वयस्याप्येकान्वयः ॥ (३२) (२५) (२६) ७० ॥

எட்டு மிரண்டு மறியாத வெம்மை யிவையறிவித்த
தெட்டவொண் ணுத விடந்தரு மெங்களம் மாதவஞர்
முட்ட வினைத்திரண் மாள முயன்றிடு மஞ்சலென்ருர்
கட்டெழில் வாசகத் தாற்கலங் காநிலை பெற்றனமே. (௩௪)

अज्ञाताष्टाक्षरादिं सुकृतपरिणतेर्मामिदं ज्ञापयित्वा
त्वाचार्यैरन्यदूरं पदमपि ददतश्श्रीपतेर्नोऽघसङ्घम् ।
कृत्स्नं संरम्भिणश्च क्षपयितुमिति [9]नो माशुचस्त्वं कुतश्चि-
द्वक्तुस्सर्वत्र भास्वच्चरमवचनतोऽक्षोभ्यनिष्ठां गतास्स्मः ॥ ७१ ॥

अज्ञाताष्टाक्षरादिं [10]मां इदं सुकृतपरिणतेराचार्यैः ज्ञापयित्वा अन्यदूरं पदमपि ददतः [11]मे कृत्स्नं अघसङ्घं क्षपयितुं संरम्भिणश्च कुतश्चित् त्वं मा शुच इति वक्तुः नः श्रीपतेः सर्वत्र भास्वच्चरमवचनतः अक्षोभ्यनिष्ठां गतास्स्म इत्यन्वयः ॥ (३२) (२७) ७१ ॥

வானு ளமர்ந்த வருக்கும் வருந்தவரு மிங்கிலைகள்
தானுள ஞயுகக் குந்தர மிங்கு நமக்குளதே
கூனுள நெஞ்சுக ளாற்குற்ற மெண்ணி யிகழ்ந்திடினும்
தேனுள பாத மலர்த்திரு மாலுக்குத் தித்திக்குமே. (ருரு)

एतद्ग्रन्थोक्तनिष्ठा [1]अपि परमपदस्थामरैर्यत्नसाध्याः
प्राप्तानां नस्स्वयं ता गतवत इह वीक्ष्यास्ति हर्षिस्वभावः ।
वक्रस्वान्तैः प्रबन्धेऽप्यसत इति च तत्कर्तरि प्रोच्य दोषान्
क्लृप्ते चानादरेऽयं मधुमिलितपदाम्भोरुहश्रीशभोग्यः ॥ ७२ ॥

[2]परमपदस्थामरैरपि यत्नसाध्याः एतद्ग्रन्थोक्तनिष्ठाः स्वयं प्राप्तानां नः ताः गतवतः वीक्ष्य इह हर्षिस्वभावोऽस्तीति वक्रस्वान्तैः प्रबन्धेऽपि [3]तत्कर्तर्यपि असतः दोषान् प्रोच्य अनादरे [4]क्लृप्तेऽपि अयं मधुमिलितपदाम्भोरुहश्रीशभोग्य इत्यन्वयः ॥ (३२) (२८) ७२ ॥

வெள்ளைப் பரிமுகர் தேசிக ராய்விர காலடியோம்
உள்ளத் தெழுதிய தோலையி லிட்டனம் யாமிதற்கென்
கொள்ளத் துணியினுங் கோதென் றிகழினுங் கூர்மதியீர்
எள்ளத் தனையுக வாதிக ழா[5]தென் னெழின்மதியே. (ருசு)

श्वेताश्वानन एव देशिकतयोद्भूयोपदेशेन य-
ल्लेखिन्या हृदि मेऽलिखत्तदलिखं पत्रेऽस्य किं दूषणम् ?
सद्भिस्सङ्ग्रहणेऽप्यसार इति चासद्भिः कृतेऽनादरे
दीप्ता सूक्ष्मधियस्तिलांशमपि मे हृष्येन्न दुःख्येन्न धीः ॥ ७३ ॥

[6]हे सूक्ष्मधियः ! श्वेताश्वानन एव देशिकतया उद्भूय उपदेशेन लेखिन्या मे हृदि यदलिखत् तदहं पत्रेऽलिखम् । अस्य दूषणं किम् ? सद्भिस्सङ्ग्रहणेऽपि असद्भिः असार इति अनादरे कृतेऽपि मे दीप्ता धीः तिलांशमपि न हृष्येत् न दुःख्येदित्यन्वयः ॥ (३२) (२९) ७३ ॥

अधिक्रियासङ्ग्रहदीपिका मया
हृदि स्थितेनाश्वमुखेन कारिता ।
सुखेन तस्यार्थबुभुत्सुभिर्बुधै-
[1]र्विमत्सरैः कारुणिकैर्निरीक्ष्यताम् ॥ ७४ ॥

[2]अधिकारसङ्ग्रहपदार्थबोधिनीं
निजदासरङ्गशिशुना हृदि स्थितः ।
हयवक्त्र एव ललितं ह्यकारयद्-
द्रमिडानभिज्ञविबुधैर्निरीक्ष्यताम् ॥ ७५ ॥

॥ इति कौशिकरङ्गदासेन विरचिता

अधिकारसङ्ग्रहदीपिका

सव्याख्या

समाप्ता ॥

|| श्रीः ||

# || अधिकारसङ्ग्रहदीपिकायाः सव्याख्यायाः पाठान्तराणि ||

| पुटम् | संख्या | अङ्कः | पाठान्तराणि |
|---|---|---|---|
| 5 | 1 | ख | द्वितीयश्लोको नास्ति |
| ,, | 2 | ग | सारस्थ |
| ,, | 3 | ख ग | अधिक्रियासङ्ग्रहगाथया स्वकानवन्तमाचार्यमदोऽहंटीकया। |
| ,, | 4 | ,, | योगिनं गुरुं |
| ,, | 5 | ,, | भावये ॥ |
| ,, | ,, | क | चतुर्थपञ्चमौ श्लोकौ न स्तः । |
| ,, | ,, | ख ग | षष्ठश्लोको नास्ति । |
| ,, | 6 | क | दीपिकां कौशिकोऽयम् । दासश्श्रीमद्वेङ्कटाचार्यपुत्रो रङ्गाख्यस्तल्लब्धबोधः करोति ॥ |
| ,, | ,, | ख ग | दीपिकां श्लोकरूपाम् । दास......बोधः करोति ॥ |
| ,, | 7 | क | सर्वेषां प्रायेणार्थोऽभिधीयते । श्लोकेषु तेषु व्याख्योक्ततात्पर्यार्थांशसंयुतः ॥ & स्वशब्दैरुच्यतेऽत्रार्थस्तात्पर्यार्थांशसंयुतः ॥ |
| ,, | ,, | क ख | केषाञ्चित् प्रायेणार्थोऽभिधीयते । क्वचित् क्वचिच्च केषाञ्चित् तात्पर्यार्थोऽत्र लिख्यते ॥ |
| ,, | 8 | ग | स्वशब्दैरुच्यतेऽर्थश्च पदस्वारस्यमेव च ॥ |
| ,, | 9 | ख ग | नवमश्लोको नास्ति । |
| 6 | 1 | ,, | दशमश्लोको नास्ति । |
| ,, | 2 | क | बहुदोषगोपनाः । |
| ,, | 3 | क ग | சீரார் தூப்புற்றிருவேங்கடமுடையான் திருவடிகளே சரணம்.<br>रामानुजदयापात्रं ज्ञानवैराग्यभूषणम् ।<br>श्रीमद्वेङ्कटनाथार्यं वन्दे वेदान्तदेशिकम् ॥<br>சீரொன்று தூப்புற்றிருவேங்கடமுடையான்<br>பாரொன்றச் சொன்ன பழமொழிகள்-ஓரொன்று<br>தானே யமையாதோ தாரணியில் வாழ்வார்க்கு<br>வானேறப் போமளவும் வாழ்வு.<br>श्रीमते हयग्रीवाय नमः ॥ |

| पुटम् | संख्या | अङ्कः | पाठान्तराणि |
|---|---|---|---|
| 6 | 4 | क ख ग | कासाराद्या मुनीन्द्रास्त्रय इह मुनिवाहश्च भक्ताङ्घ्रिरेणुश्शीताम्भस्ताम्रपर्णीतट- |
| ,, | 5 | ,, | शेखर इति मषि(ऴी)शै भक्तिसारः प्रदेशे सम्भूतज्योतिरात्मा सकलजगति चाम्नायसम्यक्प्रदीप्त्यै ॥ |
| ,, | 6 | ,, | मङ्गेत्युदितपुरजनाधीश्वरस्सं- |
| ,, | 7 | क | -त्येतैः प्रीतैस्सुगीताः & त्येतैः प्रीत्या सुगीताः |
| ,, | ,, | ख | त्येतैः प्रीतैः प्रगीताः |
| ,, | 8 | ,, | -मिह जनितास्सा- |
| ,, | 9 | क | अन्वयो लिख्यते। कासाराद्याः त्रयः मुनीन्द्राः शीताम्भस्ताम्रपर्णीतटभव— |
| ,, | ,, | ग | अर्थ(क्रमेण) पदानामन्वयो लिख्यते। कासाराद्याः |
| ,, | 10 | क | नः मुनिवाहश्च भक्ताङ्घ्रिरेणुः मषि(ऴी)शै इति प्रदेशे सम्भूतः ज्योतिरात्मा भक्तिसारः सकलजगति आम्नायसम्यक्प्रदीप्त्यै |
| ,, | ,, | ग | शेखरः मुनिवाहश्च.........सकलजगति चाम्नायसम्यक्प्रदीप्त्यै |
| ,, | 11 | क | मङ्गेत्युदितपुरजनाधीश्वरश्चेत्येतैः प्रीत्या सुगीताः श्रीधरेण माल्यवत्। |
| ,, | ,, | ग | मङ्गेत्युदितपुरजनाधीश्वरश्च प्रीतैरित्येतैः प्रगीताः माल्यवत् |
| ,, | 12 | क ख ग | सार्थमभ्यस्य |
| ,, | 13 | क | अकलङ्कं यथावत् विद्मो हीत्यन्वयः ॥ २ ॥ |
| ,, | ,, | ग | अकलङ्कं यथावत् विद्मो हि ॥ २ ॥ |
| 7 | 1 | क ख ग | आनन्दाश्रयणाभ्युपेयपुरुषार्थेषु च्युति- |
| ,, | 2 | ग | चोत्सादने |
| ,, | 3 | ख ग | —दितार्थकरणे कृष्णे<br>[अस्मिन् श्लोके चतुर्थे "कृष्णेऽवतीर्णे स्थिते तं त्यक्त्वा" इति वाक्यश्रवणेन मधुरकविसूरिः कृष्णे जीवति (लीलाविभूतावेव अवतीर्य वर्तमाने स्वस्थानगमनात् पूर्वं) तं विहाय पराङ्कुशमुनिं प्रपेद इति गम्यते। सम्प्रदायाचार्यवराणां श्रीसूक्तिपरामर्शने तु तथाविधार्थस्वीकरणं विरुद्धमिति प्रतिभाति। श्रीकृष्णस्य भूलोकपरित्यागानन्तरमेव मधुरकविः श्रीशठारिमुनिं प्रपेद इति वक्तव्यम्, यतः पराङ्कुशावतारः श्रीकृष्णस्य भूलोकपरित्यागादनन्तरम् (स्वस्थानश्रीवैकुण्ठगमनादनन्तरं) एव सञ्जातः। अयं चार्थः "ஒரு செவ்வாய் முந்திலோமே" इति |

| पुटम् | संख्या | अङ्कः | पाठान्तराणि |
|---|---|---|---|
| | | | श्रीपराङ्कुशमुनिः खिद्यति स्म इति वार्तया सुप्रसिद्धः। सा च वार्ता "ईषत् पूर्वं अहं यद्यभविष्यम् तदा इह भूलोक एव सकलमनुजनयनविषयतां प्राप्य सर्वाननुगृह्य विराजमानं सुभोग्यं श्रीकृष्णं बाह्येनापि चक्षुषा साक्षात् सन्दृश्य प्रपद्य सम्यगनुभूय संसेव्य उदजीविष्यम्। हन्त! हन्त!! पश्चादजनि मयेति" अतीव निर्वेदमगमत् श्रीमान् कारिसूनुः शठकोपः" इति चैतिह्यसिद्धा वर्तते।<br><br>तथा च, "அன்பர்க்கே யவதரிக்குமாயன் நிற்க" इत्यस्य, "बहूनि मे व्यतीतानि जन्मानि तव चार्जुन" इति रीत्या "ஒன்றியொன்றி யுலகம் படைத்தான், சன்ம சன்மாந்திரம் காற்று" इत्यादि श्रीसूक्तिसामरस्याय च आत्मोज्जीवनार्थं बहुधा कृष्णेऽवतीर्णेऽपि, शास्त्रेऽपि "मामेकं शरणं व्रज" इति भगवदाश्रयणस्यैव मोक्षोपायत्वप्रतिपादनेऽपि भगवद्भक्ताश्रयणं सुकरं सूज्जीवकं चेति सिद्धान्तार्थस्य अनुष्ठानप्रदर्शनपूर्वं प्रतिपादनाय भगवन्तं परित्यज्य शठवैरिसूरिमेव स्वीचकार सर्वस्वतयेति वर्णनमेव सुष्ठु भवेदिति भाति। |
| 7 | 4 | ख ग | दोषास्पृष्टकविप्रकाशित- |
| ,, | 5 | ग | -त्रयेऽप्येवमन्वयो द्रष्टव्यः। कवीतिपदस्य पूर्वं मधुरेति शेषः। |
| ,, | 6 | क | सुकरः। कविनेति शेषः। श्लोकद्वयस्य एकान्वयः ॥ 4 ॥ |
| 8 | 1 | ख | शेषं |
| ,, | 2 | क ग | -जननात् |
| ,, | 3 | ख | समुद्भूतं |
| ,, | 4 | ,, | पुर इह |
| ,, | 5 | ,, | वदान्यं |
| ,, | 6 | ,, | यतिपतिम् ॥ |
| ,, | 7 | ,, | गुरुं पूर्णं |
| ,, | 8 | ,, | गुरुमपि |
| ,, | 9 | ,, | -पतिं |
| ,, | 10 | ,, | -नयनं तस्य ददतम्। |
| ,, | 11 | ,, | मुनिं नाथं |
| ,, | 12 | ,, | सुभोग्यामित्येतान् श्रियमपि भजे श्रीशचरणौ ॥ |
| ,, | 13 | क | भगवतोऽङ्घ्री त्वथ भजे & तत उपासे हरिपते ॥ |
| ,, | ,, | ग | किल भजे श्रीशचरणौ & भगवदङ्घ्री त्वथ भजे ॥ |

| पुटम् | संख्या | अङ्कः | पाठान्तराणि |
|---|---|---|---|
| 8 | 14 | क | शरणमुपगम्य तदाचार्यश्रेणिं क्रमत उपनम्य अथ कृपया भूते पुरवरे समुद्भूतः उदारः यतिपतिः, पूर्णः गुरुः, श्रीयामुनगुरुरपि, श्रीरघुपतिः तस्य |
| ,, | ,, | ग | स्वाचार्यं भूते पुरवरे समुद्भूतं उदारं [शरणमुपगम्य] स्वाचार्यं [शरणमुपगम्य] भूते पुरवरे समुद्भूत उदारः प्रपत्त्याख्यं मार्गं तस्य वितरन् |
| ,, | 15 | ,, | श्रीरपि |
| ,, | 16 | क | ततो हरिपदे उपासे इत्यन्वयः ॥ ६ ॥ |
| ,, | ,, | ग | श्रीशचरणौ भज इत्यन्वयः ॥ |
| ,, | 17 | क ग | " लोकार्हाकल्पकीर्तेः " इति पदं नास्ति । |
| 9 | 1 | ख ग | वशात न त्वा ? इहाप्यन्य- |
| ,, | 2 | ,, | -बुद्ध्या । |
| ,, | 3 | क | कुमतीञ्जित्वा |
| ,, | 4 | ग | दयां कुर्वतः |
| ,, | 5 | ख | भूत्वैव |
| ,, | 6 | क | संसारेऽनादिकालं द्रुततरगमनं संविधाय इह |
| ,, | 7 | ग | -वशत आत्मज्ञानादिभाजः वयं नत्वा |
| ,, | 8 | ,, | पश्चाच्च देहे |
| ,, | 9 | क ग | कुमतीन् जित्वा |
| ,, | 10 | ग | दयां कृत्वा च |
| ,, | 11 | ,, | -मुनेः दासा भूत्वा |
| ,, | 12 | क | पश्चाच्च |
| ,, | 13 | क ग | पठेमेत्यन्वयः ॥ ९ ॥ |
| ,, | 14 | ,, | सत्प्रेमवद्दासयोः |
| ,, | 15 | क | निगमं निगद्य |
| ,, | ,, | ग | द्रमिडागमस्य |
| ,, | 16 | क | गानञ्च भाषाश्रुतेः । |
| ,, | ,, | ख | गानञ्च संयच्छतः । |
| ,, | ,, | ग | गानं वदान्यस्य च । |
| ,, | 17 | क | दातुश्चास्य |
| ,, | ,, | ख | औदार्येण |

| पुटम् | संख्या | अङ्कः | पाठान्तराणि |
|---|---|---|---|
| 9 | 17 | ग | दत्वोदीर्य |
| ,, | 18 | क ख ग | -साध्य- |
| ,, | 19 | ग | द्रमिडागमस्य |
| ,, | 20 | ,, | उदीर्य दत्वा वदान्यस्य |
| ,, | 21 | ,, | -साध्य- |
| ,, | 22 | क ग | भुवि नः |
| ,, | 23 | ,, | प्रणम्य, प्रतिदिनमिति शेषः ॥ १० ॥ |
| 10 | 1 | ख | स्वरक्ष्या इति |
| ,, | 2 | ख ग | तदपि च |
| ,, | 3 | ग | नः तत् एवं |
| ,, | 4 | क ग | इह भोक्तुं एकं भाग्यं नः प्राप्तं हीत्यन्वयः ॥ २१ ॥ |
| ,, | 5 | क | नोऽप्युक्तियोग्यं त्विति वयमरुणाब्जाङ्घ्रिदास्यं विधातुम् । & नोऽपीति वार्तानुगुणमिह सरोजाङ्घ्रिदास्यं विधातुम् । |
| ,, | ,, | ख ग | नोऽपीति वादानुगुणमिह सरोजाङ्घ्रिदास्यं विधातुम् । |
| ,, | 6 | क | गर्भोदितोग्रांहस्सरिति ? न यथा सन्निपत्य |
| ,, | ,, | ख | गर्भोदितांहसि [तोग्रांहसि] |
| ,, | ,, | ,, | गर्भोदिते चांहसि |
| ,, | 7 | क | -स्तथार्थान् फणितुमलमिमान् सूक्ष्म- |
| ,, | ,, | ख | -स्तथार्थान् फणितुमलमभीष्टांश्च [थो सूक्ष्म-] |
| ,, | ,, | ग | -स्तथार्थान् फणितुमलमथो सूक्ष्म- |
| ,, | 8 | क | श्रीशवक्षः नोऽपि |
| ,, | 9 | ,, | वार्तानुगुणमिह सरोजाङ्घ्रिदास्यं विधातुं |
| ,, | ,, | ग | वादानुगणमिह सरोजाङ्घ्रिदास्यं विधातुं |
| ,, | 10 | क | गर्भोदितोग्रांहसि |
| ,, | ,, | ग | गर्भोदितांहसि |
| ,, | 11 | ,, | तथा अर्थान् पञ्चार्थज्ञाः सूक्ष्मसम्बन्धयुक्तं यथा तथा |
| ,, | 12 | क | इमान् अर्थान् |
| 11 | 1 | ख | पुनरपि |
| ,, | 2 | ख ग | कार्त्स्न्येन कथमपि |
| ,, | 2 (a) | ग | चिन्तयन्तः दर्शनस्थापकाः |
| ,, | 3 | ख | स्थित्याद्यान् |

| पुटम् | संख्या | अङ्कः | पाठान्तराणि |
|---|---|---|---|
| 11 | 3 | ग | स्थित्याद्याः |
| ,, | 4 | ख | जगत इह दधच्चेश्वरः |
| ,, | 5 | ,, | स्वाशेषं किञ्चिदस्तीत्यवचनमखिलं शेषमित्युक्तियोग्यम् । |
| ,, | 6 | क | त्वितीत्थम् । |
| ,, | 7 | ख | स्वामी चेति |
| ,, | 8 | ,, | एव ॥ |
| ,, | 9 | क | " स्थित्यादीन् ....... दधत् " इति नास्ति । |
| ,, | ,, | ग | जगतः स्थित्याद्याः कल्पयित्वा दधत् |
| ,, | 10 | क | ईश्वरश्च किञ्चिच्च अस्य न शेषमिति अगदितं यथा तथा अखिलं स्वस्य शेषमितीत्थं उक्तः अत एव असमः स्वामीति स्थितस्य तुलसीमौलिकस्यैव देहाः उपाधिं च मुक्त्वा दासा वयमिति |
| ,, | ,, | ग | ईश्वरश्च स्वाशेषं किञ्चिदस्तीत्यवचनं यथा तथा अखिलं शेषमित्युक्तियोग्यञ्च यथा तथा स्वामीति असम इति च |
| ,, | 11 | ग | -मौलिकस्य देहा उपाधिं मुक्त्वा दासाश्च वयं इति |
| ,, | 12 | ,, | एव |
| 12 | 1 | ख | एकश्श्रीशः पुमर्थः परम इह पदे |
| ,, | 2 | क ग | परम इह पदे |
| ,, | 3 | ख | -मतमुपायञ्च |
| ,, | 4 | ,, | पञ्चार्थज्ञा अविद्यान्वितदुरितमहाशृङ्खलेत्यस्मदार्या, निश्शेषभ्रान्तिनाशं त्विदमुपदिदिशुर्हृद्यशङ्कोदयं नः ॥ |
| ,, | 5 | क | इह एकः श्रीशः परमः पुमर्थः तस्य पदे |
| ,, | ,, | ग | तस्य पदे संश्रित्य ( 'स...श्रीशः' इति नास्ति । ) |
| ,, | 6 | क ग | जीवः |
| ,, | 7 | ,, | अमतियुतदुरितात्मा निष्कम्पा शृङ्खला |
| ,, | 8 | ,, | आर्या हृदि |
| ,, | 9 | ,, | नः अब्रुवन् |
| ,, | 10 | ख ग | प्रदात्री । |
| ,, | 11 | ख | ऽस्म्यपरनियमनानर्ह इत्यज्ञता च व्युच्छिन्ना |
| ,, | 12 | ग | -प्रदार्याः कर्मान्वित |
| ,, | 13 | ,, | -प्रदात्री, |

| पुटम् | संख्या | अङ्कः | पाठान्तराणि |
|---|---|---|---|
| 12 | 14 | ग | -भ्रान्तिः अहं |
| ,, | 15 | ,, | करुणया नः |
| 13 | 1 | क ख ग | भयदमिह यथा |
| ,, | 2 | ख ग | शर्वश्चेन्द्रो |
| ,, | 3 | ख | वचनं वादिनो वदेयुः । |
| ,, | 4 | ,, | दुर्वारात्तर्कगर्वादथ निगमशिरोदेशिकाख्श्रीयुक्त्या, युक्तं पद्म स्थयादिं प्रथितमिह तथा निर्णयं स्तं (?) पुराणम् ॥ |
| ,, | 5 | ग | प्रजेशः शर्व इन्द्रश्च |
| ,, | 6 | क ग | भयद |
| ,, | 7 | क ख ग | -नादिपुंसः |
| ,, | 8 | क | हि सुवददाचार्यसम्यक्कृपातो |
| | | ख | -मतिजनकाचार्यसम्यक्कृपातो |
| | | ,, | -समभिवदद्देशिकानां कृपातो |
| ,, | 8 | ख ग | च सुवददाचार्यसम्यक्कृपातो |
| ,, | 9 | ख | जित्वा दुष्टेन्द्रियाणि प्रबलतरफलं मोक्षमिच्छेद्विवेकी ॥ |
| ,, | 10 | ग | संसारवार्धिञ्च एतत् साधु एतत् न साधु इति सुवददाचार्य-सम्यक्कृपातः एकः धीमान् इन्द्रियाणि जित्वा प्रबलफलं मोक्ष-मिह अपेक्षत इत्यन्वयः ॥ ७ ॥ |
| 14 | 1 | क ख ग | मोक्षं संप्रार्थनीयं |
| ,, | 2 | ख | -महदपि |
| ,, | 3 | ,, | स्वार्हे चैकत्र कृ (?) |
| | | ग | भवसरणेर्मूलकर्मापनोदे |
| ,, | 4 | ,, | "स्वसदृशि......इत्यन्वयः" इति नास्ति । |
| ,, | 5 | ख ग | दृढोपायस्थित्या उचितमपि कर्मर्जु सुधिया, समीचीनं ज्ञानं त्विति विचितमन्तर्दृगुच्चिताम् । सुमक्ति शीघ्रैतत्त्रितयविरहिणामीशकृपया, विदुर्विप्रा न्यासन्त्वभिलषितकाले च फलदम् ॥ ९ ॥ |
| ,, | ,, | | (ख व्या.) ऋजु सुधिया समीचीनमिति विचित ज्ञानमित्य-न्वयः । उत्तरत्र ईशकृपया अभिलषितकाले फलदं न्यासञ्चे-त्यन्वयः ॥ ९ ॥ |
| ,, | ,, | | (ग-व्या.) दृढोपायस्थित्याः उचितं कर्मापि ऋजु सुधिया समीचीनमिति विचितं ज्ञानञ्च अन्तर्दृगुचितां सुमक्तिञ्च शीघ्रैतत्त्रयविरहिणां ईशकृपया अभिलषितकाले फलदं न्यासञ्च |

| पुटम् | संख्या | अङ्कः | पाठान्तराणि |
|---|---|---|---|
| | | | त्रिप्रा विदुः इत्यन्वयः । शीघ्राश्च एतत्त्रयविरहिणश्चेति द्वन्द्वः ॥ ९ ॥ |
| 14 | 6 | क | संविदन्तो हि विप्राः ॥ |
| ,, | 7 | ,, | संविदन्तो हि विप्रा इत्यन्वयः ॥ |
| 15 | 1 | ख | अन्योपायार्थदैवैविरहिण उरुमन्त्वप्रकम्प्यानुकम्पाम् (?) । |
| ,, | 2 | ,, | नर इति बहुवचनम् । विप्राद्याः आदिं यथा आप्नुयुः तथा गुरवः तत्प्रकारं बुध्द्वा नः अबोधयन्नित्यन्वयः ॥ १० ॥ |
| ,, | 3 | ग | अन्त्याश्च |
| ,, | 4 | ,, | नरः |
| ,, | 5 | ,, | अकिञ्चनाश्च |
| ,, | 6 | ,, | उपगतास्सन्तः |
| ,, | 7 | ,, | धृत्वा इह |
| ,, | 8 | ,, | तत्प्रकारं बुध्द्वा नः |
| ,, | 9 | क ख ग | -विधिं |
| ,, | 10 | ख | नस्तथोचुर्न आर्याः । |
| ,, | 11 | क ख ग | शेषित्वादीन् |
| ,, | 12 | ख | वयमस्मत्सदृशा- |
| ,, | ,, | ग | वयं शेषित्वादीन् |
| ,, | 13 | ख | प्रति नः भवक्लेशं |
| ,, | 14 | ,, | तथा सत्सहायोत्तमवरणविधिं न आर्याः प्राहुरित्यन्वयः ॥ ११ ॥ |
| ,, | 15 | ग | नः दुःखावस्थायां |
| ,, | 16 | ,, | विधिं |
| 16 | 1 | ख | भारश्चैवोपगच्छेन्न इति |
| ,, | ,, | क ख ग | न स्यादुद्दिश्यभारो न इति |
| ,, | 1 (a) | ग | न इत्यध्याहर्तव्यम् । नः श्रुतिषु |
| ,, | 2 | ख | स्थेयाः गुरवः तु |
| ,, | ,, | ग | स्थेया गुरवः |
| ,, | 3 | क ख | दिना एत- |
| ,, | ,, | ग | दिना तु एत- |
| ,, | 4 | ख | इति च भारः अपगच्छेदेवेति च प्राक् नः |
| ,, | ,, | ग | इति शिक्षयित्वेति शेषः । प्राक् |

| पुटम् | संख्या | अङ्कः | पाठान्तराणि |
|---|---|---|---|
| 16 | 5 | क | पदाध: भार: न स्यादिति |
| ,, | ,, | ख | पदाधः न: रक्ष्यवस्तु न्यक्षिपन् इत्यन्वयः ॥ १२ ॥ |
| ,, | ,, | ग | पदाधो भारो न स्यादित्युद्दिश्य च |
| ,, | 6 | ,, | इत्यन्वयः ॥ १२ ॥ |
| ,, | 7 | ख | व्यामुग्धेनेव पूर्वं बहुयतनवता स्वीकृता रक्ष्यवस्तु । अस्मन्मुख्याः प्रपन्नाः कृतयजनशता रक्षकाराध्यदेव-श्रीसूरीशास्पदश्रीपरमपदमनोभावसारादिविज्ञः ॥ |
| ,, | 8 | क ग | अस्मन्मुख्याः |
| ,, | 9 | ग | रक्षकाराध्यदेवश्रीसूरीशास्पदश्रीपरमपदनिविष्टाशयास्सारविज्ञः ॥ |
| ,, | 10 | क | रागिणश्चैव हंसाः ॥ |
| ,, | 11 | ख | व्यामुग्धेनैव पूर्वं बहुयतनवता रक्ष्यवस्तु रक्ष्यवस्तुत्वेनेत्यर्थः । स्वीकृता अस्मन्मुख्याः प्रपन्नाः रक्षकाराध्यदेवश्रीसूरीशास्पद-श्रीपरमपदमनोभावसारादिविज्ञाः कृतयजनशता इत्यन्वयः ॥१३॥ |
| ,, | 12 | क | "गृहीताः" इति नास्ति । |
| ,, | ,, | ग | भरत्वेन स्वीकृताः अस्मन्मुख्याः प्रपन्नाः रक्षकाराध्यपूज्यदेव-श्रीसूरीशास्पदश्रीपरमपदनिविष्टाशयाः हंसाः कृतयजनशतश्चैव इत्यन्वयः ॥ १३ ॥ |
| ,, | 13 | क | अस्मन्मुख्यः |
| ,, | 14 | ,, | हंसाः |
| 17 | 1 | ख | गता [स्सुस्थितिं दर्शितेषु, स्वार्हं कर्माचरन्तस्त्वनुचितमखिलं कर्म सन्त्यज्य नित्यम् ]. |
| ,, | 2 | क ख ग | दर्शितेष्वेषु त्रिषु |
| ,, | 3 | ख | [सुस्थितिं] |
| ,, | 4 | ,, | अनुचितमखिलं कर्म सन्त्यज्य नित्यं स्वार्हं कर्माचरन्तः ] |
| ,, | 5 | ग | निष्ठाः स्वेषु सन्तीति तद्व्यतिकरैर्लिङ्गैर्निश्चिन्वन्तः |
| ,, | 6 | ख | सूरयो हि ॥ १४ ॥ |
| ,, | 7 | ,, | -श्रीमदात्मात्मभारा |
| ,, | 8 | क | -श्चाभिनन्द्याप्नुवन्ति ॥ |
| ,, | 9 | ग | स्वीकृतस्वात्मभाराः अत एव त्रिभ्यो ऋणेभ्यो मुक्ताः द्रमिड-निगममौल्याशयज्ञाः श्रेष्ठाः प्रपन्नाः प्रीतितः सम्प्रार्थ्यं अनिशं सूरिभरचितं सर्वदास्यं अस्मिन् भूलोके स्वयं पुमर्थमभिनन्द्य अतिमुदिताः सन्तः आप्नुवन्तीत्यन्वयः ॥ १५ ॥ |

| पुटम् | संख्या | अङ्कः | पाठान्तराणि |
|---|---|---|---|
| 17 | 10 | क | प्रीतितः अनिश |
| ,, | 11 | ,, | अभिनन्द्य |
| ,, | 12 | ख | मुदिताश्चाप्नुवन्तीत्यन्वयः ॥ १५ ॥ |
| 18 | 1 | ख | आचार्यात्प्राप्तधीश्च प्रथममितरवाप्याहिताज्ञानशान्तिः नैष्कृष्ट्या त्मान्यशेषत्वरहितभगवच्छेषतादिस्वभावः । अस्माकं श्रीरहस्यत्रय-मपि करुणा दीयमानाद्द्वितीया (शेषत्वं तस्य दासेष्वपगतकलुषेष्वा-स्रवन्तोऽर्पयन्तु ॥ ) |
| ,, | 2 | क ग | संसृतौ |
| ,, | 3 | क | संसृतौ |
| ,, | ,, | ग | संस्सृतौ नः |
| ,, | — | * | वेदाब्जं वेदचन्द्रम् "अब्जो जैवातृकस्सोमः" इत्यमरः । |
| 19 | 1 | ग | -वासिश्रियइनविलसद्वासवैकुण्ठ- |
| ,, | 2 | ,, | -क्रममेवान्वयः ॥ १९ ॥ |
| 20 | 1 | क ग | शुभदे |
| ,, | — | * | क्षणिकरुचिसदृग्देहमुक्तिप्रयाणेः क्षणिका रुचिः प्रकाशो यस्यास्सा क्षणिकरुचिः विद्युत्, तत्सदृक् तत्सदृशः देहः तस्य मुक्तिः मोक्ष, वर्जनं, तत्काले यत् प्रयाणं ब्रह्मलोकप्राप्तये गमनं तस्मिन् समयेः |
| ,, | 2 | क | यथाक्रममन्वयः ॥ |
| ,, | ,, | ग | यथाक्रममेवान्वयः ॥ २० ॥ |
| ,, | 3 | क | -मध्यागतप्राणार्केन्दु- |
| ,, | ,, | ग | -मध्यापतद्वाय्वर्केन्दु- |
| ,, | 4 | क | प्रपन्नः गतेस्समये |
| ,, | ,, | ग | गतेस्समये......तीत्यन्वयः ॥ प्रपन्न इति शेषः ॥ २१ ॥ |
| ,, | 5 | ,, | -मेत्याखिलजनसुमित- |
| 21 | 1 | ,, | यथाक्रममन्वयः ॥ २२ ॥ |
| ,, | 2 | क ग | -रनन्य- |
| ,, | 3 | ,, | मक्तिप्रपदनसरणी |
| 22 | 1 | ग | वाक्यं कृतदृढकरुणस्य |
| ,, | 2 | क | -गदितनयस्या- |
| ,, | ,, | ग | शिखरनयोक्ताध्वभङ्गं |

| पुटम् | संख्या | अङ्कः | पाठान्तराणि |
|---|---|---|---|
| 22 | 3 | क ग | अत्यादृत्य |
| ,, | 4 | क | गदितनयस्य |
| ,, | ,, | ग | -शिखरनयोक्ताध्वभङ्गं |
| ,, | 5 | क ग | न चाङ्गी- |
| ,, | 6 | ,, | नैव शक्यं अतः अगतिकं यथा तथा पादाश्रितानां |
| 23 | 1 | ग | मनुमखिलजगत्प्राप्यमेवाभ्यसेम ॥ २७ ॥ |
| ,, | 2 | क ग | सुशरणमुपगम्याब्ज- |
| ,, | 3 | ,, | सुशरणमुपगम्य नः |
| ,, | 4 | ,, | नाथं प्राप्य मोद- |
| 24 | 1 | ,, | श्रीपतेरावरणदृढ- |
| ,, | 2 | ग | सावधानं रचयितुं |
| ,, | 3 | क ग | श्रीपतेः आवरणदृढ- |
| ,, | 4 | ग | अज्ञानशून्या वयमभूमेति शेष इत्यन्वयः ॥ |
| ,, | 5 | ,, | -चित्तात् |
| ,, | 6 | क ग | -मतियुतभगवत्केवलाराधसम्पत्पूर्ण- |
| ,, | 7 | ग | यथाक्रममन्वयः ॥ ३० ॥ |
| ,, | 8 | ,, | -गतस्यैषदेतद्धि (व्या.) |
| 25 | 1 | ,, | निघ्नतां चित्रचेष्टोऽपि एकां |
| ,, | 2 | ,, | सर्वमीषद्धि |
| ,, | 3 | क | -त्रयान्यशेषत्वोज्झत्स्वभावो |
| ,, | ,, | ग | -त्रयेऽन्यशेषत्वोज्झत्स्वभावो |
| ,, | 4 | क ग | रसिकगुणविदां |
| ,, | 5 | ग | यथाक्रममन्वयः ॥ ३२ ॥ |
| ,, | 6 | क ग | शान्त्यादियुक्तक्रोधाद्युन्मुक्तशिष्ये स्वयमतिकुतुकश्रीशतदासद-त्तात् । |
| ,, | 7 | क | हेयवर्जं |
| ,, | 8 | ,, | -साधर्म्यदा हि । |
| ,, | 9 | ग | -हृदयमवेत्योदिता युग्मयुक्तत्रिंश- |
| ,, | 10 | क | हेयवर्जं यथा तथा शान्त्यन्वितानां शिष्याणां |
| ,, | ,, | ग | अवेत्योदिताः युग्मयुक्तत्रिंशत्संख्या उच्चारणे सति श्रोत्रेषु अमृतमिव लसन्त्यश्च अन्तगाथाः त्रिलक्ष्मद्रमिडयुतवचश्श्रीकार इत्यन्वयः ॥ ३२ ॥ |

| पुटम् | संख्या | अङ्कः | पाठान्तराणि |
|---|---|---|---|
| 25 | 11 | क | -कुतुक- |
| ,, | 12 | ,, | तद्दासदत्तात् & तद्दासक्लृप्तात् |
| 26 | 1 | ग | -प्रकृतिः श्रीवत्सः महान् गदा ज्ञानाज्ञाने असिकोशौ अहङ्कार-युग्मं धनुः कम्बु च चित्तं चक्रं इन्द्रियदशकं शराः उभौ भूतवर्गौ माला चेति तार्क्ष्याङ्कागमार्थः । |
| 27 | 1 | क ग | अन्यैरलभ्य- |
| ,, | 2 | क | यथाक्रमं |
| ,, | ,, | ग | यथाक्रममन्वयः ॥ |
| ,, | 3 | क ग | वास्तव्यैः परमे पदे च भुवि चामर्त्यैस्समीड्यो गिरिः |
| ,, | 4 | क | यथाक्रमं |
| ,, | ,, | ग | यथाक्रममन्वयः ॥ |
| ,, | 5 | * | " அமைத்ததோ ரெழிற்றனு "<br>" அமைத்தொ ரெழிற்றனு "<br>என்று இரண்டு விதமாய் உரை காண்கிறது. |
| 28 | 1 | क | सर्वोत्कृष्टाजिदेशो ह्युचितनिरुपमेष्वाससन्धीयमान- |
| ,, | ,, | ग | सर्वोत्कृष्टाजिदेशो ह्युचितनिरुपमप्रोज्ज्वलच्चापरोप्यत्सद्बाणेनास्त्रि-रक्षःकदशकनिकराधःपातनोच्छक्तिभाजः ? । |
| ,, | 2 | ,, | -रघनाश्याश्रितस्यारिभूषा ॥ ६ ॥<br>तत् इति शेषः । यथाक्रममन्वयः ॥ ६ ॥ |
| ,, | 3 | क | अष्टावित्यनुषङ्गः । |
| ,, | ,, | ग | अत्राष्टावित्यनुषङ्गः । |
| ,, | 4 | ,, | -भाजां अष्टौ अहिंसादिकानि तानि सुमानि अष्टौ ऊहादय इमाः सिद्धयश्च अष्टविधा भक्तजनवात्सल्यादिका भक्तिश्च अष्टौ यमादिकानि योगाङ्गानि च अष्टौ अणुत्वादयः विभवाश्च अष्टौ ते । |
| 29 | 1 | क | शान्तिरसोऽपि |
| ,, | 2 | क ग | दुर्लभमित्यन्वयः ॥ ८ ॥ |
| ,, | 3 | ग | -सकलप्रजावननिमित्तमेकेच्छया<br>-सकलप्रजावनविधान एकेच्छया<br>-सकलात्मरक्षणविधान एकेच्छया<br>-सकलात्मरक्षणनिमित्तमेकेच्छया<br>-सकलात्मजीवनकृते तदेकेच्छया |

| पुटम् | संख्या | अङ्कः | पाठान्तराणि |
|---|---|---|---|
| 29 | 4 | ग | स्वेन तु तदेकेच्छया प्रसृष्टसकलात्मजीवनकृते निमित्तं रुचिर-भास्वरद्वारकापुरस्थजन(ऋ)[वृ]द्धये वसुदेवत उदेत्य क्षितिप-पार्थसारथ्यकृत् तुषारतुलसीसुमोल्लसदुराः जीवनकृते स्वयं व्याहृतं अद्वयमुपायं स्वयं नः आत्तभरं स्वं सदा उद्वीक्ष्य मुदधि-काङ्घ्रिसंवहनपूर्वदास्यार्गलां विवेकनयनापिधानभवकेलिं अत्य-क्षिपत् इत्यन्वयः ॥ १० ॥ |
| ,, | 5 | क | स्वेन तु एकेच्छया प्रसृष्ट — |
| ,, | 6 | ,, | अद्वयमुपायं |
| ,, | 7 | ,, | -सर्वदास्यार्गलां |
| ,, | 8 | ,, | इत्यन्वयः ॥ १० ॥ |
| 30 | 1 | क | अन्वयस्सुकरः ॥ १२ ॥ |
| ,, | ,, | ग | स्रष्टुः अस्त्रवत् । यथाक्रममन्वयः ॥ १२ ॥ |
| ,, | 2 | क | श्रमयुतापराङ्गानि |
| ,, | ,, | ग | व्यसनयुक्परागानि वा |
| ,, | 3 | ,, | गुणिनं |
| ,, | 4 | ,, | स नो नरकमर्दनस्त्वावृणोत् ॥ |
| ,, | 5 | क | केशवः ॥ |
| 31 | 1 | ग | अहमेव साधनं प्रकृष्टं फलमपि भवेयम् । तथैव तत्साधकश्च मदधीनस्सन् मां आश्रयति । तथैव शरणागतिश्च वः साधनं |
| ,, | 2 | क | श्रमयुतापराङ्गानि |
| ,, | ,, | ग | व्यसनयुक्पराङ्गानि वा शरणागतौ न चैव समस्त- |
| ,, | 3 | ,, | त्वे तु अहं |
| ,, | 4 | ,, | गुणिनं |
| ,, | 5 | ,, | स्वयं तु वदन् नरकमर्दनः सः नः आवृणोत् इत्यन्वयः ॥ १४ ॥ |
| ,, | 6 | क | केशवः |
| ,, | 7 | ,, | आवृणोत् इत्यन्वयः ॥ १४ ॥ |
| ,, | 8 | क ग | पतिरिह । |
| ,, | 9 | ग | " स्वसङ्कल्पे......गतानां " इति नास्ति |
| ,, | 10 | क | इमां मे |
| ,, | ,, | ग | इह भवे मे |
| ,, | 11 | ,, | प्रसभमिह |
| ,, | 12 | ,, | सम्यग्ज्ञानात् |
| ,, | 13 | क ग | वितनुत इत्यन्वयः ॥ |

| पुटम् | संख्या | अङ्कः | पाठान्तराणि |
|---|---|---|---|
| 32 | 1 | ग | सरोमुन्यादीन् |
| ,, | 2 | * | अत्र " स्थल " इति पदं छन्दोऽनुवर्ति स्यात् । |
| ,, | 3 | ग | द्वापरयुगे क्वचन समये चेतनधने कृपाकर्त्रा चित्राचरितविभुना मितभुवि |
| ,, | 4 | ,, | त्रीन् समेत्य |
| ,, | 5 | ,, | ध्यानकाले |
| ,, | 6 | ,, | सरणिं अधिकं |
| ,, | 7 | क ग | हि इत्यन्वय: ॥ १८ ॥ |
| 33 | 1 | ग | -दुलूखलकमध्य- |
| ,, | 2 | ,, | सुमार्गविमद्दरवृष- |
| ,, | 3 | क ग | सद्रसनसूक्तिसद्गोचरौ |
| ,, | 4 | ग | योग्यौ स्थितौ पातीड्गालकुमार- |
| ,, | 5 | क | श्लोकानां यथाक्रममेकान्वय: ॥ २२ ॥ |
| ,, | ,, | ग | चतुर्णां श्लोकानां यथाक्रमं सुलभोऽन्वयः ॥ २२ ॥ |
| 34 | 1 | ग | தெளிந்து தோர்வார் |
| ,, | 2 | ,, | दोषोक्ता अन्यसम्यग्गुण अनभिमतिस्सद्गुरो: |
| ,, | 3 | ,, | -वाचा ॥ २३ ॥ |
| ,, | 4 | ,, | सदसद्विबुध्य सङ्ग्रहेण त्वसदर्थेषु गतस्पृहः क्षमायाः । अवधौ शुचिभिर्भृशं ह्यनाशे सुपथे सम्प्रविशेत् प्रदर्शिते नः ॥ २४ ॥ |
| ,, | 7 | क | अचलदृढमति: " தெளிந்த தோரார் " इति पाठे क्षुद्रेऽर्थे विराग , " தெளிந்த தோர்வார் " इति पाठे निरति-शयेऽर्थे आशामुपगात:, " தெளிந்து தோர்வார் " इति पाठे सद्वा असद्वेति विविच्य सदुपगन्ता । |
| ,, | 5 | ग | अर्थं सत्यं |
| ,, | 6 | ,, | अन्यसम्यग्गुणे दोषोक्तौ अनभिमति: सद्गुरोः भ्रान्तिशून्यं ज्ञानं प्राप्त: अस्मदङ्गीकरणकृदपि संसारवृध्यङ्कुराणां केषाञ्चित धीमितानां दुष्टसङ्केतवाचा अचलदृढमतिः सत् असच्च विबुध्य सङ्ग्रहेण असदर्थेषु गतस्पृहः पुमान् क्षमाया अवधौ भृशं शुचिभिः प्रदर्शिते अनाशे नः सुपथे सम्प्रविशेत् इत्यन्वयः ॥ २४ ॥ |
| ,, | 8 | क | विशेत् इत्यन्वय: ॥ २४ ॥ |
| 35 | 1 | क ग | मोचयञ्छ्रीपतेस्तु । |
| ,, | 2 | ग | स्यादित्येतत्स्वमार्गप्रवचनजनितात् ? |

| पुटम् | संख्या | अङ्कः | पाठान्तराणि |
|---|---|---|---|
| 35 | 3 | क | द्युति- |
| ,, | 4 | क | अमोचयंश्च । श्रीपतेस्तु |
| ,, | 5 | ,, | मुख्यं नेति |
| ,, | ,, | ग | श्रियः पतेस्तु कारुण्यं मुख्यं मुक्त्युपायः । न परमिति विदुः । |
| ,, | 6 | क ग | ते नः |
| ,, | 7 | ,, | क्षमेरन् । |
| ,, | 8 | ,, | इत्यन्वयः । |
| ,, | 9 | ग | वा |
| ,, | 10 | ,, | मां सुकृतपरिणतेराचार्यैरिदं |
| ,, | 11 | क | नोऽघसङ्घं कृत्स्नं |
| ,, | ,, | ग | ददतः अघसङ्घं कृत्स्नं |
| 36 | 1 | क | दिविषदधिपतीनां च साध्याः प्रयत्नात् |
| ,, | ,, | ग | स्वर्गस्थानाञ्च साध्याः प्रयतनत इदङ्ग्रन्थसम्प्रोक्तनिष्ठाः प्राप्तानां |
| ,, | 2 | क | दिविषदधिपतीनां च प्रयत्नात् साध्याः |
| ,, | ,, | ग | स्वर्गस्थानाञ्च प्रयतनतस्साध्या इदङ्ग्रन्थसम्प्रोक्तनिष्ठाः स्वयं |
| ,, | 3 | ,, | तत्कर्तरि च |
| ,, | 4 | ,, | क्लृप्ते च |
| ,, | 5 | ,, | इत्यन्वयः इदङ्ग्रन्थ इति समस्तं पदम् ॥ २७ ॥ |
| ,, | 6 | ,, | " என்னெழின் "; " எம்மெழின் " என்றும் பாடம். |
| ,, | 7 | क | हे सूक्ष्मधियः । इति सम्बोधनम् । दीप्तेति धीविशेषणम् । उप-देशेन लेखिन्या हृदि पत्रे इत्युभयं व्यस्तरूपकम् । शेषोऽन्वय-स्सुकरः ॥ |
| ,, | ,, | ग | अन्वयस्सुकरः ॥ २९ ॥ |
| 37 | 1 | क ग | -निरीक्ष्यतां कारुणिकैर्विमत्सरैः ॥ |
| ,, | 2 | ,, | " अधिकार........" इत्यन्त्यश्लोको न दृश्यते । |

—: * :—

॥ श्रीः ॥

# ॥ त्रिलोचनशिवाचार्यकृता सिद्धान्तसारावलिः ॥

॥ अनन्तशम्भुकृतव्याख्यासहिता ॥

*Edited by*
**Sri R. K. Parthasarathi,** M. A., L. T.,
*and*
**Sri T. H. Viswanathan,** Siromani.
(*Continued from Page 64 of Volume XVIII No. 2*)

बिन्दुशक्तिरिति प्रोक्ता नादशक्तिकला द्विजाः ।
आभिः कलाभिस्संक्लृप्तदेहयुग्देशिकोत्तमः ॥

व्यापिनी व्योमरूपा च ह्यनन्ता ह्यपरा तथा ।
अनाथानाश्रिता चाभिः बहिःकरणसंयुतः ॥

अन्तःकरणसंयुक्तस्समनाकल्पतत्त्वयुक् ।
आत्मा तत्त्वोन्मनश्शैवे समापूरितदेहयुक् ॥ इति ॥ १०९ ॥

पूर्णाहुतिविधानार्थं स्रुचि षडध्वन्यासपूर्वकं शक्तिशिवावाहनमाह—**आज्याढ्यामिति** ।

**आज्याढ्यां निहितस्रुवां स्रुचमधश्शङ्खाख्ययादाय सः**
**प्रोत्थायोद्गतपूर्वकायसमपात् स्रुङ्मूलनाभिः स्मरेत् ।**
**पञ्चाधारसमस्थिताध्वनिचयं स्रुक्कुम्भदण्डाग्रख-**
**ग्रीवांशेषु च शक्तिमाज्यसरणौ वक्त्रे शिवं स्रुङ्मयम् ॥ ११० ॥**

**आज्याढ्यां** घृतसमृद्धामाज्यपूरितामित्यर्थः । **निहितस्रुवां** अधोमुखत्वेन स्रुग्बिलोपरि विन्यस्तस्रुवयुक्तां **स्रुचं शङ्खाख्यया** शङ्खाकारवत् कृतमुद्रया **आदाय**

गृहीत्वा स गुरुः **प्रोत्थाय** आसनादुत्थाय **उद्धृतपूर्वकायः** उन्नतपूर्वशरीरः **समपात्** सदृशस्थितपादः **स्रुङ्मूलनाभिः** नाभौ धृतस्रुङ्मूलश्च **पञ्चाधारसमस्थिताध्वनिचयं** पञ्चाधारेषु मण्डलवह्निकुम्भशिष्यस्वात्माख्यपञ्चाधिकरणेषु समस्थिताध्वनिचयं समानाकारेण पूर्वं विन्यस्तषडध्वसमूहं पञ्चस्थानेषु शिवस्य विद्यमानत्वात्पूर्वं षडध्वन्यासः सर्वत्र कार्यः । इदानीं सर्वत्रावस्थिताध्वनिचयं गृहीत्वा स्रुच्यावाहयेत् ।

सर्वेषां कर्मणां साक्षी मण्डले समवस्थितः ।
यज्ञस्य रक्षकत्वेन शिवकुम्भे व्यवस्थितः ॥

होमाधिकरणत्वेन पावकस्थस्सदाशिवः ।
शिष्यदेहे तु तच्छिष्यपाशमोचनकारकः ॥

अनुग्रहकरो देवो मम देहे व्यवस्थितः ।
पञ्चाधिकरणो देवः सोऽहमेव सदाशिवः ॥ इत्युक्तत्वात् ॥

**स्रुक्कुम्भदण्डाग्रखग्रीवांशेषु** स्रुक्कुम्भः स्रुङ्मूलस्थितकलशः वृत्तो दण्डः वृत्ताकारदण्डः । अग्रं गण्डिका खशब्देन आकाशवाचकत्वात् बिलमुच्यते । बिलयुक्तवेदीत्यर्थः । ग्रीवा कण्ठः । एतेषामंशेषु भागेषु निवृत्त्यादिकलाक्रमेण सर्वाध्वनिचयं **स्मरेत्** चिन्तयेत् । तथा मृगेन्द्रे—

स्रुचि वाध्वानमारोप्य कलशं स्कन्धगण्डिका ।
वेदीग्रीवामुखांशेषु निवृत्त्यादिविभागशः ॥ इति ॥

स्रुङ्मुखे शिवावाहनस्य कृतत्वात् षडध्वस्थानं विहितमनुसन्धेयम् । **आज्यसरणौ** घृतनिर्गमनपद्धतौ **शक्तिं** स्मरेत् । **वक्त्रे** स्रुङ्मुखे **स्रुङ्मयं** स्रुक्स्वरूपं **शिवं** स्मरेत् । सर्वाध्वव्यापकं देवं स्रुगित्यनुस्मरेदित्यर्थः । 'स्रुक्स्रुवव्यपदेशेन शक्तिपिण्डस्सदाशिवः ।' इत्युक्तत्वात् ॥ ११० ॥

युग्मश्लोकेन पूर्णाहुतिसमये प्राणमन्त्रनाडीप्रशान्तशक्तिकान्ततत्वाख्यसप्तविषुवभेदध्यानमाह—**शिष्येति** ।

**शिष्यात्मस्वपनस्समीरणसमायोगो भवेत्प्राणवं**
**नादात्मैक्यविचिन्तनान्मनुविधुः कन्दान्मनूच्चारतः ।**

**ग्रन्थिच्छेदत एव नाडिविषुवं तन्मध्यनादोद्गमात्**
**षट् त्यक्त्वादिकलाः प्रशान्तविषुवं शक्तौ लयस्सप्तमे ॥ १११ ॥**

**शक्तिस्थो ध्वनिरूर्ध्वमेव विसरेत्तच्छक्तिसंज्ञं कला-**
**सप्तेन्द्वष्टदश प्रकल्प्य त्रुटिभिश्शक्तेर्मनान्तं त्रिधा ।**
**तत्प्राणेऽप्यपरः परापरपरौ कालाह्वयं तत्परं**
**तत्त्वाख्यं विषुवं ध्रुवं परशिवस्थानं तु चिद्व्यक्तिकृत् ॥ ११२ ॥**

**शिष्यात्मस्वमनःसमीरणसमायोगः** शिष्यात्मनः स्वमनसश्च समीरणेन प्राणवायुना समायोगः अन्योन्यैक्यसम्बन्धः, **प्राणवं** प्राणवायुसम्बन्धविषुवं प्रथमं भवेत् । तथोक्तम्—

आत्मनश्च मनः प्राणे संयोज्य विषुवं भवेत् ।
प्राणवद्विषुवं ख्यातं शिष्यस्वमनसोरपि ॥ इति ॥

**कन्दात्** मूलाधारे विद्यमानकमलकन्दात् **मनूच्चारतः** मन्त्रोच्चारणात् **नादात्मैक्यविचिन्तनात्** नादे आत्मनः ऐक्यस्वरूपध्यानात् **मनुविषुं** मन्त्रविषुवं द्वितीयम् । उक्तं च—

आत्मनो नादमध्ये तु लयं सञ्चिन्त्य कन्दतः ।
अकारोकारवर्णादिसंयोगेन वियोगतः ।
हृदयादिबिलान्तेषु विषुवं मन्त्रसंज्ञकम् ॥ इति ॥

**ग्रन्थिच्छेदतः** मेढ्रादिदशग्रन्थिभेदनात् **तन्मध्यनादोद्गमात्** सर्वासां नाडीनां मध्ये सुषुम्नायाः प्रधानत्वात् सुषुम्नामध्यगतनादस्य प्रकाशनात् **नाडी विषुवं** तृतीयम् । उक्तं च—

मेढ्रोर्ध्वे कन्दनाभिश्च हृदयं कण्ठकूपिका ।
कण्ठम्याग्रं भ्रुवोर्मध्यं ललाटं ब्रह्मणो बिलम् ॥

शक्तिं च द्वादशान्तं च दशग्रन्थीननुक्रमात् ।
मूलमन्त्रं त्रिशूलेन भित्त्वा नादः प्रवर्तते ।
नादनाडीसमायोगात् तन्नाडीविषुवं मतम् ॥ इति ॥

अन्यत्रापि—

सर्वासामेव नाडीनां मध्ये या संव्यवस्थिता ।
सुषुम्ना सा समाज्ञेया नाभेश्शक्तेश्शिवं गता ।
तत्र प्रवाहयेन्नादं नाडीविषुवमुच्यते ॥ इति ॥

**आदिकला:** अकारोकारमकारबिन्दुनादनादान्ताख्यषट् **त्यक्त्वा** कारणेश्वराणां त्यागात् **सप्तमे शक्तौ** सप्तमशक्तिस्थाने आत्मनो **लयः प्रशान्तविषुवं चतुर्थम्** । उक्तं च—

अकारोकारवर्णौ द्वौ मकारो बिन्दुसंज्ञकः ।
नादनादान्तसंज्ञौ च त्यक्त्वा ब्रह्मादिषु क्रमात् ॥
सप्तमे शक्तिमध्ये तु शिष्यात्मानं लयं नयेत् ।
प्रशान्तं तद्विजानीयात् प्रशान्तेन्द्रियगोचरम् ॥ इति ॥

**शक्तिस्थः** शक्तिमध्यस्थो **ध्वनिस्स** नादः **ऊर्ध्वमेव विसरेत्** 'यदा चलेत्तदा **शक्तिसंज्ञं** विषुवपञ्चमम् । उक्तं च—

शक्तिमध्यगतो नादः समनान्तः प्रसर्पति ।
तच्छक्तिविषुवं प्रोक्तं........ ॥ इति ॥

**त्रुटिभिः** त्रुटिः भ्रूक्षेपमात्रप्राणकाः ल' भ्रूक्षेपमात्रो यः कालः स त्रुटिः परिकीर्तितः' इत्युक्तत्वात् । ताभिः त्रुटिभिः **कलासप्तेन्द्वष्टदश प्रकल्प्य** कला षोडश सप्तेन्दुः सप्तदश अष्टादशसंख्याकान् कृत्वा **शक्तेः** शक्तिमारभ्य **समनान्तं** समनाशक्तिपर्यन्तं **त्रिधा प्रकल्प्य, तत्प्राणे** प्राणस्य एकमन्त्रोच्चारेण त्रिधाकरणात् त्रिधाभूतप्राणेऽप्ययपरः **परापरपरौ** अपर इति परापर इति पर इति । **कालाह्वयं** कालनामधेयं विषुवं षष्ठम् । अत्रायमर्थः—

षोडशत्र्युटयात्मकश्शक्त्यन्तः प्राणसंचारः अपरः कालः । सप्तदशत्र्युटयात्मकः व्यापिन्यन्तः प्राणचारः परापरः कालः । अष्टादशत्रुटयात्मकः समनान्तः प्राणचारः परः कालः ।

प्राणमेवं त्रिधा कालं ज्ञात्वा चैवं त्रिधा कुरु ।
अपरष्षोडशो यावत् सप्तदशः परापरः ॥

तस्मात्परस्तु यः कालः स प्रियेऽष्टादश स्मृतः ।
प्राणमेवं त्रिधा कालं ज्ञात्वा चैव त्यजेत्पुनः ॥

अपरश्शक्तिमूर्धिस्थो व्यापिन्यन्तं द्वितीयकम् ।
तृतीयं समनान्तं तु कालं विषुवमुच्यते ॥ इति ॥

**तत्परं** समनाशक्तेः परं उन्मन्यन्ते विद्यमानं **ध्रुवं** नित्यभूतं **परशिवस्थानं** परमशिवस्य स्थानभूतं **चिद्व्यक्तिकृत्** आत्मव्यक्तिकारकं **तत्त्वाख्यं** तत्त्वनामधेयं **विषुवं** सप्तमं भवेत् । 'उन्मन्यन्तं ततः प्रोक्तं तत्त्वं विषुवसंज्ञकम्' इत्युक्तत्वात् । उन्मनायाः परे तस्मिन्निष्कळे परे शिवे शिष्यात्मसंयोजनं तत्त्वविषुवमित्यर्थः ॥ ११२ ॥

आध्यात्मस्रुग्भावनापूर्वं तत्त्वविषुवे शिष्यात्मयोजनार्थं पूर्णाहुतिमाह— **तस्मिन्निति** ।

**तस्मिन्सत्सुधयाढ्यकन्दकलशान्नाडीसुदण्डा स्वहृ-**
**त्पद्मश्वभ्रगलोर्ध्वतालुसुषिराबिन्दुस्रवत्स्वामृता ।**
**स्रुक् चेत्यान्तरभावगा स्रुतघृतापातेन संयोजये-**
**त्स्थैर्यं चापरपूर्णया क्षणकलालक्ष्यं तथापादयेत् ॥ ११३ ॥**

**नाडीसुदण्डा** मध्यनाडीयुक्तशोभनदण्डा । स्रुग्दण्ड एव मध्यनाडी इत्यर्थः । **स्वहृत्पद्मश्वभ्रगलोर्ध्वतालुसुषिरा** स्वहृत्पद्मं स्वहृदयकमलं, श्वभ्रं स्रुग्वेदिबिलं, तेन युक्तं । वेदीबिलमेव यथाक्रमं सत्स्वहृदयकमलमित्यर्थः । गलोर्ध्वतालुसुषिरा कण्ठतालुपथव्यक्तरन्ध्रा **बिन्दुस्रवत्स्वामृता** बिन्दुस्थानात् प्रक्रान्तप्रसरत् परसुधारसयुक्तामृता इति । एवं त्रिधा **स्रुक्चेत्यान्तरभावगा** आन्तरभावनां प्राप्ता स्रुग्रूपध्यानानन्तरं बहिरनुक्रियत इति भावः । एवं स्रुग्ध्यानम् । **तस्मिन्** चिद्व्यक्तिकृत्परशिवस्थाने पुनरावृत्तिरहिते स्रुवे **सत्सुधयाढ्यकन्दकलशात्** शोभनामृतसंपूर्णस्रुङ्मूले विद्यमानकलशकन्दात् **स्रुतघृतापातेन** कन्दाद्विनिर्गतपरामृतभावनायुक्तघृतधारापातेन **संयोजयेत्** शिष्यात्मानं संबन्धयेत् । उक्तं च—

**पूरकं कुम्भकं कृत्वा सर्वद्वाराणि योजयेत् ।**
नादस्संभावयेन्मन्त्रं प्रक्रियामूलमाश्रितः ॥

दिव्यं करणमास्थाय परभावसमन्वितम् ।
शिष्यात्मकुम्भवह्निभ्यो मण्डलादपि षड्विधम् ॥

सङ्गृह्याध्वानमारोप्य प्राणनाडीगतस्रुचः ।
अग्रे गुरूक्तकन्दादेर्मन्त्रमुच्चारयेत्क्रमात् ॥

मूलमन्त्रं त्रिशूलेन भित्वा ग्रन्थीननुक्रमात् ।
प्रासादाध्वशिखान्तस्थमात्मानं च लयावधि ॥

नीत्वा त्यक्त्वा मानसं वै व्यापारं बोधरूपयुक् ।
शिवे षड्गुणसंपूर्णे चिदानन्दस्वरूपके ।
ध्यायन्विधानमात्मानं शनैः पूर्णां निपातयन् ॥

तावत्तिष्ठेत्कुम्भकेन न यावत् सर्पिषा स्थितिः ।
धैर्येण योजना कार्या पुनः पूर्णाहुतिं क्षिपेत् ॥ इति ॥ ११३ ॥

शिष्यचैतन्यस्य सर्वज्ञत्वादिषड्गुणापादनमाह—**सृष्टयेति ।**

**सृष्ट्याग्नौ च नियोज्य तत्र परया शिष्यस्य चिद्व्यक्तिकं**
**सर्वज्ञत्वसुतृप्त्यनादिकमतिस्वातन्त्र्यसंज्ञानि च ।**
**शक्तिं पूर्तिमतीमनन्तविषयां षट्कं गुणानां निशति**
**ह्यापाद्यानलतश्शिवेन सदृशं शिष्ये तदा योजयेत् ॥ ११४ ॥**

**शिष्यस्य** पूर्वोक्तवत् पूर्णाहुतिपर्यन्तं दीक्षितस्य **चिद्व्यक्तिकं** दृक्क्रियात्मकचैतन्यव्यक्तिस्वरूपं **परया** उत्कृष्टया **सृष्ट्या** सृष्टिमार्गेण शिष्यचैतन्याकर्षणेन आत्मनः मूलस्थानादारभ्य द्वादशान्तपर्यन्तं नीत्वा पुनर्द्वादशान्ताद्दण्डिकास्थानमानीय नासिकाद्वारेण पुष्पाञ्जलिगतं ध्यात्वा **तत्राग्नौ** कुण्डे विद्यमानशिवाग्नौ **नियोज्य** संयोजनं कृत्वा स्रुवेण तिसृभिस्तिसृभिः आहुतिभिः **सर्वज्ञत्वसुतृप्त्यनादिकमतिस्वातन्त्र्यसंज्ञानि च** सर्वज्ञता परितृप्तता अनादिबोधता स्वातन्त्र्यसंज्ञानि च स्वतन्त्रशक्तिता । **पूर्तिमतीं शक्तिम**लुप्तशक्तिकाम**नन्तविषयाम**नन्तशक्तिकामिति एवंप्रकारेण **गुणानां षट्कमापाद्य** सम्पादयित्वा नैसर्गिकगुणा-

नामनादिमलपाशकदर्थितत्वादुत्पत्तिं जनयित्वेत्यर्थः। नु इति पदच्छेदः। **नु** पश्चादग्नौ पूर्णाहुत्या षड्गुणानां योजनानन्तरमिति। **अनलतः** आवाहितषड्गुणान्विताग्निसकाशात्। उच्यत इति शेषः। **तदा** तस्मिन् काले **शिवेन** स्वभावादनादिपाशरहितशिवेन **सदृशं** समानं शिष्यगुणं **शिष्ये** **योजयेत्** सम्पादयेत्। तथा मृगेन्द्रे—

गुणानापाद्य तत्रैव सिद्धानाहुतिभिस्त्रिभिः।
स्वतन्त्रादिविधेर्दार्ढ्यादिच्छन्त्येवं विपश्चितः॥ इति॥ ११४॥

त्रिपदार्थां चतुष्पदां भुक्तिमुक्तिफलप्रदां संहितां यो विजानाति शिष्योऽसौ सेकमर्हतीत्युक्तत्वादेवंगुणशीलसंपन्नस्य शिष्यस्य आचार्याभिषेकविधिमाह—**सिक्त इति।**

**सिक्तः पाशविमोचको गुरुवरो रत्नौषधीबीजकैः**
**पूर्णैर्भूतघटैस्स्थिरासनकलाक्लृप्तैस्सपञ्चावृतैः।**
**सब्रह्माङ्गशिवार्चनाजपयुतैर्दीक्षाप्रतिष्ठादिके**
**योग्यस्स्याद् गुरुणा शिवाग्रविहितप्राप्ताज्ञयोक्तव्रतः॥ ११५॥**

**रत्नौषधीबीजकैः** रत्नानि पञ्चरत्नानि। तथा **चोक्तम्**—

माणिक्यं चैव वैडूर्यं मुक्ताफलं प्रवालकम्।
इन्द्रनीलं च रत्नानां पञ्चकं परिकीर्तितम्॥

रत्नशब्देन स्वर्णादिलोहहरितालादिधातवश्च गृहीताः। ओषधयः सहदेव्यादयः। तथा मृगेन्द्रे—

सहदेवी तथा ब्राह्मी त्रायन्ती लक्ष्मणावती।
शङ्खपुष्पी बला बीजा ज्योतिष्मत्यपराजिता॥

विष्णुक्रान्ता बला मोटा बिल्वधात्र्यभयामृता।
शताह्वा शाबरी दूर्वा कुशव्याघ्री पुनर्नवा॥ इति॥

बीजानि शालिसिद्धार्थयवादीनि। एतैः **पूर्णैः** प्रतिकलशं पूरितैः **भूतघटैः** पञ्च कुम्भैः पश्चिमोत्तरयाम्यपूर्वेशानादिदिक्षु संस्थापितैः। पुनः किंभूतैः। **स्थिरासन-**

**कलाक्लृप्तैः** स्थिरासनेन आधारशक्त्यादिसमग्रकासनेन व्रीह्यादिधान्यसप्तकासनेन च कलाभिर्निर्वृत्त्यादिपञ्चकलाभिर्यथाक्रमेण परिकल्पितैः **सपञ्चावृतैः** प्रत्येकं पञ्चावरणसहितैः **सब्रह्माङ्गशिवार्चनाजपयुतैः** ब्रह्मभिः सद्यादिपञ्चब्रह्मभिर्यथाक्रमेण अभिमन्त्रितैः अङ्गशिवार्चनया प्रत्येकं षडङ्गसहितशिवपूजया जपेन प्रत्येकं साष्टशतमूलमन्त्रजपेन युतैः कुम्भैः **सिक्तः** अभिषिक्तः । तथा चोक्तम् –

पश्चिमं सद्यमन्त्रेण वामेनोत्तरतस्स्थितम् ।
दक्षिणं बहुरूपेण नरेण प्राग्व्यवस्थितम् ॥
ईशानेनैशमालभ्य सर्वान् साङ्गेन शम्भुना ॥ इति ॥

**गुरुणा शिवाग्रविहितप्राप्ताज्ञया** शिवाग्रे स्थण्डिलादिस्थितपरमेश्वरसंनिधौ विहितया एवमुत्तरत्र कार्यं कुर्विति कृतया । तथोक्तम्—

त्वयाधिकरणं वत्स गुरुपारम्परागतम् ।
नित्यं नैमित्तिकं काम्यं सदा तद्देशवासिना ।
अद्य प्रभृति कर्तव्यं सुविचार्य शिवाज्ञया ॥ इति ॥

प्राप्ताज्ञया शिष्येण तथेति प्रतिज्ञातगुर्वाज्ञया **उक्तव्रतः** गुरुणोक्तव्रताचारयुक्तः । तथा चोक्तं स्वायम्भुवे—

अथाचार्यव्रतं श्रेष्ठं चरेदाचार्य एव हि ।
सद्यादिशिवपर्यन्तामभ्यसेन्मन्त्रसंहिताम् ॥

पक्षत्रयमधश्शायी नक्ताशी चरुभुक् सदा ।
मौनी त्रिषवणस्नायी द्वन्द्वानुद्विग्नसंयतः ।
शुक्लाम्बरधरश्शान्तश्शुक्लमाल्यानुलेपनः ॥

योगपट्टाक्षसूत्रश्च मौञ्जाजिनपवित्रयुक् ।
जपं च प्रत्यहं कुर्यादनुद्विग्नस्सहस्रकम् ॥

होमं प्रतिदिनं कुर्याज्जपान्ते शक्तितः क्रमात् ।
घृतेन वा घृताक्तैर्वा तिलैः क्षीरेण तण्डुलैः ॥ इति ॥

एवमभिषिक्तश्शिष्यः **दीक्षाप्रतिष्ठादिके** दीक्षायां प्रतिष्ठायां लिङ्गप्रतिष्ठापवित्रितादिकार्यकरणे **योग्यः स्याद्भवेत्** । **पाशविमोचकः** मलादिपाशहरणदक्षः स्यात् । अत एव **गुरुवरो** भवेत् गुरुवरशब्देनैतदुक्तं भवति—

योग्यः स्यात् सर्ववर्णानां प्रतिष्ठायां महोत्सवे ।
स्नपने प्रोक्षणे चैव प्रायश्चित्तेऽभिषेचने ।
व्याख्यानादौ च शस्तः स्यात् स्वार्थे वाऽथ परार्थके ॥

सर्वदेवार्चने विप्रस्त्वादिशैवो गुरूत्तमः ।
विप्रादयस्त्रयो वर्णाः दीक्षायां स्थापनेऽपि च ॥

ब्राह्मणः क्षत्रियादीनां क्षत्रियश्शूद्रवैश्ययोः ।
वैश्यश्शूद्रस्य दीक्षायां स्वस्वजातौ विशिष्यते ॥

स्वार्थेष्टौ चललिङ्गस्य प्रतिष्ठायां त्रयस्त्विमे ।
शूद्रोऽपि शूद्रदीक्षायां स्वार्थे तु चलसंज्ञके ॥

बाणलिङ्गेक्षणे वापि स्थापको यदि नैष्ठिकः ।
सनादाखिलमन्त्रेषु शिवज्ञाने विशेषतः ॥

शूद्रस्यापि गृहस्थस्य नित्येष्टावेव योग्यता ।
तत्रापि नादरहितैर्मन्त्रैरेव प्रकीर्तिता ॥
अभिषेके त्वयोग्योऽयं किं पुनः स्थापनादिषु ॥ इति ॥ ११५ ॥

शिवागमविहितदीक्षायां विशेषाधिकारित्वद्योतनार्थं सर्वोपादानभूतबिन्दोरारभ्य शैवकुलमाह—**बिन्दोरिति** ।

**बिन्दोस्तत्स्थमहेश्वराच्छिवकुलं गायत्रिशक्त्यङ्कितं**
**विद्येशादिसुरक्रमादुदभवद् दुर्वाससेह क्षितौ ।**
**ऋष्यादेस्तदनुग्रहोदयजुषो वर्षेऽभवद्भारते**
**श्रीमन्मुख्यकदम्बभूषणयुतं चामर्दसंज्ञाश्रमम् ॥ ११६ ॥**

**बिन्दोः** सर्वोपादानभूतबिन्दोः **तत्स्थमहेश्वरात्** स्थावरजङ्गमात्मकजगदुत्पत्त्यर्थं बिन्दुक्षोभकात् सदाशिवात् । अत एव बिन्द्वतीतो निष्कळ इति द्योतितः । जगदुत्पत्त्यर्थं चिद्देहो भवतीत्यर्थः । चिद्देहवता सदाशिवेन बिन्दु-

**क्षोभकाले गायत्रीशक्त्यङ्कितं** गायत्रीशक्त्या चिह्नितं बिन्दुक्षोभकाले परा शैव-गायत्रीशक्तिरुत्पन्ना। तयाधिष्ठितं शैवकुलं शैवसन्तानं **विद्येशादिसुरक्रमात्** विद्येशा अनन्तादयोऽष्टौ सदाशिवेन बिन्दुक्षोभकाले बैन्दवशरीरिणो विद्येशा उत्पन्नाः। सदाशिवस्तु निष्कलशिवाज्जातः। आदिसुरक्रमात् अनन्तेशादि-क्रमतः अनन्तेशेन ब्रह्माण्डमध्यकैलासाधिपतित्वेन श्रीकण्ठरुद्रो जातः। श्रीकण्ठा-द्विष्णुः। विष्णोर्ब्रह्मा। ब्रह्मण इन्द्रादयः सर्वे देवता उत्पन्नाः। पुनरपि श्रीकण्ठाद् दुर्वासा जातः। एवं क्रमेण इह **क्षितौ** भूलोके **दुर्वाससा** सदाशिवकुलं **उद-भवत्** जातम्। तथा चोक्तं ज्ञानशिवाचार्येण—

आग्राही किल ईश्वरः परशिवस्तस्मात्सदेशः शिवः
नादात्मा सकलाकलः प्रभुरतोऽनन्तेशभट्टारकः।
तस्मादण्डजविष्णुवासवविधिः श्रीकण्ठरुद्रस्ततः
तन्त्राणामवतारको मुनिवरो दुर्वासनामा गुरुः॥ इति॥

तत्रापि भूलोके **भारते वर्षे** भरतखण्डे **तदनुग्रहोदयजुषः** दुर्वाससा विहितदीक्षायुक्तस्य **ऋष्यादेः** कुशिककाश्यपागस्त्यभारद्वाजगौतमानाम्। आदि-शब्देन सनत्कुमार सनक सनातन सनन्दनादीनां ग्रहणम्। भारतवर्षे भरतखण्डे भूलोके जम्बूद्वीपे मध्यस्थितमेरुपर्वतस्य दक्षिणप्रदेशे स्थितः हिमगिरेर्दक्षिणभागो भारतवर्षमिति प्रसिद्धम्। तत्रापि भरतखण्डे **श्रीमद्भुक्तिमुक्तिसहितं मुख्य-कदम्बभूषणयुतं** कदम्बवृक्षालङ्कारसहित**मामर्दसंज्ञाश्रममामर्द**कमठमिति विहित नामधेयं तपोवनम**भवत्** जातम्। चकारेण अनुक्तमठान्तरं सूचितम्। प्रथममाम-र्दकमठस्थानं दुर्वाससा स्थापितम्। 'स्थानमामर्दकं नाम श्रीदुर्वासनिषेवितम्।' इत्युक्तत्वात्। दुर्वासानुग्रहपूर्वकमामर्दकमठनिवासिनः कौशिककाश्यपादयः दक्षिणामूर्तिरूपं श्रीकण्ठं आगमज्ञानार्थमुपासितवन्तः। श्रीकण्ठादागमज्ञानं लब्ध्वामर्दकमठे स्थितवन्तः। एतेषां शिष्यास्सनत्कुमारादयश्चत्वारो जातास्तान् प्रति आमर्दकमठात्त्रीणि मठानि जातानि—रणभद्रं गोळकी पुष्पगिरिरिति।

'तस्माद्विनिर्गतं स्थानं रणभद्रं च गोळकी।
तथा पुष्पगिरिश्च........॥' इत्युक्तत्वात्।

आमर्दकादीनां मठानां यथाक्रमेण सनत्कुमारादयोऽधिपाः। तथा चोक्तम्—

कैलासशिखरे रम्ये वटमूलनिवासिनम् ।
दक्षिणामूर्तिरूपं तु मुनयस्समुपासिरे ॥

अगस्त्यः कौशिकश्चैव भारद्वाजोऽथ गौतमः ।
काश्यपः परमेशानादागमार्थं च तत्त्वतः ॥

ज्ञात्वा संप्रीतमनसः ते सर्वे मुनयस्तथा ।
तेषां शिष्यास्सनन्दाद्या मुनयस्तानुपासिरे ॥

ते च लब्ध्वागमार्थं तु माठापत्येन संस्थिताः ।
आमर्दकमठपतिस्सनत्कुमारको मुनिः ।
कदम्बो वृक्ष एव स्यात् तस्य सान्तानिकाश्च ये ।
पुष्पगिरिमठपतिस्सनको वृक्षमर्जुनम् ।
तस्य सान्तानिकाश्च ये गोलकीमठनायकः ॥

सनातनो ऋषिर्वृक्षो जम्बूकस्तस्य सन्ततिः ।
रणभद्राधिपः प्रोक्तः सनन्दन इति स्मृतः ॥

न्यग्रोधो वृक्षकः प्रोक्तः तस्य सान्तनिकाश्च ये ।
गोदावरीनदीतीरे शैवानां वसतिश्शुभा ॥

पुरं मन्धरकालीति तस्यां वसति शङ्करः ।
उत्पत्तिस्तस्य शैवानामाचार्याणां विशेषतः ॥

तत्र मन्धरकाळीशमभितश्च चतुर्मठाः ।
आमर्दकी पुष्पगिरिर्गोलकी रणभद्रकम् ॥ इति ॥

ननु कौशिककाश्यपादीनां कथं शिवसृष्टित्वम्, लोके तावत् ब्रह्मसृष्टित्वेन प्रसिद्धत्वात् । सत्यम् । प्रथमं शिवसृष्टित्वेनोत्पन्नाः कौशिककाश्यपादयस्त्वपरे । नामधेयेन समानाः कौशिककाश्यपादयः शिवब्रह्मसृष्टिभेदेन द्विविधाः । अत्र शिवसृष्टित्वेन काश्यपादयः शैवसंबन्धिन इति न दोषः ।

तथा कामिके गोत्रविनिर्णये—

कौशिकः काश्यपश्चैव भारद्वाजोऽथ गौतमः ।
अत्रिर्वसिष्ठश्चागस्त्यो जमदग्निश्च भार्गवः ॥

अङ्गिराश्च मनुश्चान्यो द्विविधास्ते प्रकीर्तिताः ।
शिवसृष्टिसमोपेता मुनयः तद्विवर्जिताः ॥

शिवसृष्ट्यान्विता एते पञ्चवक्त्रेषु दीक्षिताः ।
कौशिकाद्याश्च मुनयः सर्वे सर्वत्र दीक्षिताः ॥ इति ॥

तत्रैव कामिके अर्चनापटले—

शिवसृष्टिं विना ये तु जायन्ते ब्रह्मणो मुखात् ।
ते सामान्या न तेषां तु परार्थेऽस्त्यधिकारिता ॥ इति ॥ ११५ ॥

एकविधस्यामर्दकमठस्य चातुर्विध्यकालज्ञानपूर्वकं स्वसन्तानक्रममाह—**तत्रत्येति ।**

**तत्रत्या मुनिपङ्क्तिकाश्च मनुजे पैतामहाख्ये स्थिताः**
**प्राजापत्यमुखाश्च गोचरयुगोदन्ता बभूवुस्ततः ।**
**आद्यान्तेषु च शौचसंयमयुतात्सद्गोचरादुद्ययौ**
**श्रीमद्व्यापकशम्भु पूर्वगुरुयुक् सन्तानमेवं स्थितम् ॥ ११६ ॥**

**तत्रत्या** आमर्दकमठसंप्रदायोत्पन्ना **मुनिपङ्क्तिकाः** कौशिकादिऋषिसमूहाः **पैतामहाख्ये** स्वायम्भुवनामधेये **मनुजे** मनुरिति संज्ञया जातो मनुजः मनुरित्यर्थः । चतुर्दशमनुषु प्रथमभूतस्वायम्भुवमनुसमये **स्थिता** ऋषिसंज्ञया विद्यमानस्वायम्भुवमनुकालपर्यन्तमामर्दकमठे ऋषिसम्प्रदायेन स्थिता इत्यर्थः ।

रैवतश्चाक्षुषश्चैव वैवस्वत इति स्मृतः ।
सूर्यदक्षब्रह्मधर्मरुद्रसावर्णयस्तथा ।
रोच्यभावा इमे प्रोक्ता मनवश्च चतुर्दश ॥ इति ॥

ततः स्वायम्भुवमनुकालसमाप्त्यनन्तरं स्वारोचिषमनुकाले **प्राजापत्यमुखाः** प्राजापत्य इति नामधेयपूर्वकाः । **गोचरयुगोदन्ताः** गोचराणां स्वसंप्रदायभूतवशानां युगे आमर्दकमठादिचतुर्विधसंख्याके उदन्ताः प्रसिद्धा **बभूवुः** जाताः । आमर्दकमठादिचतुर्विधसम्प्रदायभूता बभूवुरित्यर्थः । चतुर्विधमठसंप्रदायेषु उत्पन्ना आदिशैवा ब्राह्मणाश्चतुर्विधा भवन्ति । उक्तं च—

स्थानमामर्दकं नाम श्रीदुर्वासनिषेवितम् ।
तस्माद्विनिर्गतं स्थानं रणभद्रं च गोलकी ॥
तथा पुष्पगिरिश्चेति स्थानमेवं चतुर्विधम् ।
एतत्स्थानसमुद्भूताः शैवास्ते च चतुर्विधाः ॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्त्विति ।

स्वसन्तानक्रममाह—**आद्यादिति** । तेषु चतुर्विधमठसम्प्रदायेषु **शौच-संयमयुताद्बाह्य**भूतमलस्नानादिकं शौचम् । संयमः इन्द्रियनिग्रहः । संयमशब्दः यमनियमादीनामुपलक्षणम् । एतैस्सन्निहितात् **सद्गोचरात्** काश्यपभारद्वाजादि-गोत्रसहितात् । **आद्यात्** आमर्दकमठात् कलियुगप्रारम्भकाले **श्रीमद्व्यापकशम्भु** श्रीमद्व्यापकशम्भुरिति नामधेययुक्तो भुक्तिमुक्तिप्रदो महागुरुः **उदयौ** जातोऽभूत् । **एवं पूर्वगुरुयुक्**—पूर्वकाले जातगुरुपारम्पर्यसहितं **सन्तानं** वंशक्रमः स्थितः । अनेन प्रकारेण स्वजननकालपर्यन्तं जातमित्युक्तम् । अत्र पूर्वकथाप्रसङ्गः—

राजेन्द्रचोल इत्याख्यचोलभूपो महीमवन् ।
गङ्गास्नानार्थमागत्य दृष्ट्वा शैववरांस्तदा ॥
स्नात्वा प्रतिनिवृत्तस्सन् तान् समादाय शैवकान् ।
स्वराज्ये स्थापयामास शैवाचार्यवरांस्ततः ।
काञ्चीमध्ये चोलभूमौ सर्वत्रैव प्रविस्तरान् ॥ इति ॥ ११७ ॥

इति अनन्तशम्भुकृतायां सिद्धान्तसारावलीव्याख्यायां
क्रियापादो द्वितीयः समाप्तः ।

## ॥ अथ योगपादः ॥

अथेदानीं योगपादं वक्तुकामः तदर्थं सुषुम्नादिनाडीनामुत्पत्तिस्थानमाह— कन्द इति ।

**कन्दो नाभ्यध उत्थितस्तु निलयो नाड्यङ्कुराणां च त-**
**न्मध्येऽध्वा द्विसहस्रसप्ततिरधश्चोर्ध्वं शरीरे स्थिता ।**
**पिङ्गा कन्दविनिर्गता पृथगिडा दक्षे च वामे बिला-**
**न्नासारन्ध्रयुगाश्रिते बहिरधस्ते द्वादशान्तात्स्थिते ॥ ११८ ॥**

कदलीकन्दवत् सर्वनाड्यङ्कुराणामुत्पत्तिकारणभूतत्वात् कन्द इत्युच्यते । **नाभ्यधः** अत्र नाभ्यध इति नाभीसमीपस्थाधःप्रदेशो न विवक्षितः किन्तु नाभेर्दूरस्थिताधःप्रदेशो विवक्षितः । नाभीकमलं तु कन्दादुत्पन्नमिति ज्ञापनार्थं **कन्दो नाभ्यध उत्थितः** इत्युक्तम् । अन्यथा कन्दस्य मेढ्राधप्रदेशोत्पन्नत्वान्नाभ्यध इति व्यर्थं स्यात् । 'कन्दस्थानं मनुष्याणां देहमध्यं नवाङ्गुलम् ।' इत्युक्तत्वात् । तथा चोक्तं सिद्धान्तशेखरे—

पायोश्च द्व्यङ्गुलादूर्ध्वं लिङ्गाच्च द्व्यङ्गुलादधः ।
मध्यमेकाङ्गुलं तत्र देहमध्यं प्रचक्षते ॥

नवाङ्गुलोर्ध्वतस्तस्मादस्ति कन्दोऽण्डसन्निभः ।
चतुरङ्गुलविस्तारमुत्सेधे नाभितस्समम् ॥

त्वगस्थिभूषितः कन्दस्तन्मध्यं नाभिरुच्यते ।
तस्माच्चक्रं समुद्भूतं द्वादशारयुतं समम् ॥

जीवो भ्रमति चक्रेऽस्मिन् प्राणारूढस्स्वकर्मणा ।
बिसतन्तुमये चक्रे यथा भ्रमति लूतिका ॥

चक्रेणानेन देहोऽयं वर्धितस्संप्रवर्तते ।
कुण्डली परितस्तस्मादष्टधा कुण्डलीकृता ॥

अष्टप्रकृतिरूपा सा सुप्तसर्पसमाकृतिः ।
कन्दनाभेरधोरन्ध्रे निधाय स्वफणां दृढम् ॥

सन्निरुध्य मरुन्मार्गान् पुच्छेन स्वमुखं तथा ।

ब्रह्मरन्ध्रं च संवेष्ट्य पृष्ठस्था च सहस्थिता ॥ इति ।

अस्मिन् ग्रन्थे नवाङ्गुलोर्ध्वतस्तस्मात् इत्यत्र तस्माद्देहमध्यादूर्ध्वत उपरिभागे नवाङ्गुलः कन्दस्तिष्ठतीत्यर्थः । तन्मध्यं नाभिरुच्यते इत्यत्र कन्दमध्ये छिद्राकारेण नाभिस्तिष्ठतीत्यर्थः । **नाड्यङ्कुराणां** सर्वनाड्यङ्कुरोत्पत्तिकारणानां **निलयः** आवासस्थानभूतः । **तन्मध्ये** कन्दस्य मध्ये **अध्वा** मार्गः कुहरमस्तीत्यर्थः । तथा चोक्तम्—

मूलालवालकुहरादुदिता भवानि निर्भिद्य षट्सरसिजानि तटिल्लतेव ॥ इति ।

**द्विसहस्रसप्ततिः** नाडीनां द्विसहस्रसंख्याधिकसप्ततिसहस्रमधश्चोर्ध्वं देहमध्यादधःप्रदेशमूर्ध्वप्रदेशं च व्याप्य शरीरे सर्वप्राणिनां कन्दाद्विनिर्गताः ।

कन्दाद्विनिर्गताः नाड्यः अधस्तात् तिर्यगूर्ध्वतः ।

द्विसप्ततिसहस्राणि नाड्यः स्युस्सर्वदेहिनाम् ॥ इत्युक्तत्वात् ।

एतासां नाडीनां मध्ये द्वात्रिंशन्नाड्यः मुख्याः स्युः । तासु सुषुम्ना पिङ्गला इडा चेति तिस्रो नाड्यो मुख्याः स्युः । मुख्यत्वात् सुषुम्नादिनाडीनां व्याप्तिमाह—**कन्देति । कन्दविनिर्गता** कन्दादुत्पन्ना **पिङ्गा** पिङ्गला नाडी **पृथक्** भिन्नत्वेन कन्दोत्पन्ना **इडा** नाडी **दक्षे** कन्दमध्यात् विनिर्गतसुषुम्नाया दक्षिणभागे पिङ्गला स्थिता । इडा **वामे** वामभागे **बिलात्** ब्रह्मबिलपर्यन्तं स्थिता । उक्तं च नाडीशास्त्रे—

सुषुम्नाया इडा वामे पिङ्गला दक्षिणे स्थिता ॥ इति ।

इडापिङ्गले ब्रह्मरन्ध्रपर्यन्तं कथं स्थिते इत्याह—इडापिङ्गले **बहिर्**बाह्यदेशे दृश्यमानत्वेन **नासारन्ध्रयुगाश्रिते** नासिकारन्ध्रयुगे कुहरयुग्मे आश्रिते । सुषुम्नानाडीगते पिङ्गलेडानाडी नासारन्ध्रपर्यन्तं पृथग्भावेन स्थित्वा तदूर्ध्वं सुषुम्नानाडीमाश्रिते इत्यर्थः । **द्वादशान्तात्** शिखान्तात् **अधः** अधोभागस्थिते द्वादशान्तं त्यक्त्वा ब्रह्मरन्ध्रपर्यन्तं सुषुम्नया सह स्थिते इत्यर्थः ॥ ११८ ॥

सुषुम्नाया व्याप्तिपूर्वकं मूलाधारादारभ्य द्वादशान्तपर्यन्तं स्थितकमलदल-संख्याक्रमेण परशिवासनभूतकमलस्वरूपं युग्मेन श्लोकेनाह——पादाङ्गुष्ठत्यादिना।

पादाङ्गुष्ठयुगाच्च बस्तिकमलाद् द्वेधैकधा मध्यतः
पङ्क्त्याधारगनाडिकोपरि गता स्याद् द्वादशान्तावधि।
बस्तिर्वेदसिरादलाम्बुजयुता कन्दश्च षट्पत्रगो
नाभिः पङ्क्तिदला हृदष्टदलयुक्कण्ठः कलापत्रगः ॥ ११९ ॥

तालुर्विंशतिवेदपत्रकमलो भ्रूर्वेदपत्रा स्वरो
रन्ध्राब्जं कपरं नवच्छदकजं चोर्ध्वे सहस्रच्छदम्।
युक्तं शक्तिसुकेसरैः समनया सत्कर्णिकाढ्यं रवेः
सोमाग्न्योः स्त्रकबिम्बकं तदुपरि व्याप्युन्मनान्ते शिवः ॥१२०॥

**पादाङ्गुष्ठयुगात्** दक्षिणवामपादाङ्गुष्ठद्वन्द्वादारभ्य **बस्तिकमलात्** कन्दस्थानादधःस्थितं स्थानं बस्तिरित्युच्यते। तत्र स्थितकमलपर्यन्तं **द्वेधा** द्विप्रकारा **मध्यतः** देहमध्यभूतकन्दस्थानादारभ्य ऊर्ध्वं ब्रह्मबिलान्त**मेकधा** एकरूपा **पङ्क्त्याधारगनाडिका** पङ्क्त्याधाराः पङ्क्त्या वक्ष्यमाणाकारेण दशसंख्या स्थिताधारादिदशचक्राणि आधारस्वाधिष्ठानमणिपूरकानाहतविशुद्ध्याज्ञापर्यन्तानि, तदूर्ध्वं चत्वार्येवं दशसंख्यानि गच्छन्ति। व्याप्य स्थिता नाडिका सुषुम्नाख्या नाडी द्वादशान्तपर्यन्त**मुपरि गता** ऊर्ध्वं गता ब्रह्मरन्ध्रान्तं सकलरूपा तदूर्ध्वं द्वादशान्तपर्यन्तं निष्कलरूपा सकलशास्त्रज्ञैः ब्रह्मनाडीत्युच्यमाना सुषुम्ना द्वादशान्तं तिष्ठतीत्यर्थः। **बस्तिः** कन्दादधस्थानमाधारमित्यर्थः। **वेदसिरादलाम्बुजयुता** वेदसिरया चतुर्नाड्या सहिता वेददलाम्बुजयुता चतुष्पत्रयुक्तकमलेन सहिता बस्तिः **कन्दः षट्पत्रगः** षट्पत्रयुक्तः, तस्मादुपरि **नाभिः पङ्क्तिदला** दशपत्रसहिता **हृत्** हृदयकमल**मष्टदलयुक्** अष्टपर्णयुक्तः **कण्ठः कलापत्रगः** षोडशवर्णसहितः **तालुर्विंशतिवेदपत्रकमलः** विंशतिवेदानि विंशतिसंख्यायुक्तचतुस्संख्याकानि। चतुर्विंशतिसंख्यानीत्यर्थः। एतत्संख्याकपत्रयुक्तकमलसहितं तालुस्थानं उच्यते। **भ्रूः** भ्रूशब्देनात्र भ्रूमध्यमुच्यते **वेदपत्रा** चतुष्कर्णसहिता **रन्ध्राब्जं** ब्रह्मरन्ध्रस्थितकमलं **स्वरः** षोडशपत्रकमलं, **कपरं** कं शिरः तस्मात्पर-

मूर्ध्वे विद्यमानं **नवच्छदकजं** नवसंख्याकपर्णयुक्तकमलं **ऊर्ध्वे** द्वादशान्ते **सहस्रच्छदं** सहस्रसंख्यायुक्तपर्णसहितकमलं तिष्ठति । तत्कमलस्वरूपमाह— **शक्तिसुकेसरैः** वामादिनवशक्तिस्वरूपकिञ्जल्कैः **युक्तं** सहितं, **समनया** समनाख्यशक्त्या **सत्कर्णिकाढ्यं** पञ्चाशद्बीजयुक्तकर्णिकया सहितं **रवेस्सूर्यस्य सोमाग्न्योः** चन्द्रवह्न्योः **स्वकबिम्बकं** स्वाधिपतिसहितमण्डलयुक्तं **तदुपरि** मण्डलत्रयादुपरि ऊर्ध्वे **व्यापी** सर्वत्र व्यापकः, **उन्मनान्ते** उन्मनीशक्त्यन्ते। उन्मन्येवात्र शक्तिमण्डलं भवति । **शिवः** परशिवस्तिष्ठति इति ॥ १२० ॥

योगाभ्यासहेतुभूतां नाडीशुद्धिं युग्मेन श्लोकेनाह—**कुण्डेति** ।

**कुण्डावेष्टितगेहमध्यकलिते पट्टादिकेच्छासने**
**स्वस्थः प्रागृजुपूर्वकायगलको लग्ने द्विजो रेचयेत् ।**
**शुद्ध्यै नाडिषु मन्दमन्दमुदरं सम्पूरयेद्वामतः**
**सेन्दोर्बाह्यसमीरणेन मिहिरैस्तालैः क्रमात्कुम्भकम् ॥ १२१ ॥**

**कृत्वा शक्तिवशाद्विरेचयति तं पिङ्गार्कवाहात्तथा**
**निर्गर्भस्स ततो जयं च कुरुते खानां सगर्भः पुनः ।**
**ध्यानाज्जापयुतान्निहन्ति सकलं पापं निशोत्थं पुनः**
**प्रातस्सायमहस्सु चैष कुरुते तत्त्वादिसाक्षात्कृतिम् ॥ १२२ ॥**

**कुण्डावेष्टितगेहमध्यकलिते** स्वदेहयोग्यानुसारं वातादिशीतनिवारणार्थं कुण्डेन एकप्राकारेण द्वित्रिप्राकारेण वा आवेष्टितगेहमध्यकलिते **समन्ताद्वेष्टिते** गृहमध्यप्रदेशे कृते पट्टादिकेन दुकूलचेलाजिनादिनाच्छादिते इच्छासने स्वेच्छया विहितपीठादौ **स्वस्थस्सु**खेन स्थितः । उक्तं च—

हितजीर्णाशनस्वस्थस्त्रिकुण्डावेष्टिते गृहे ।
बाधाशून्ये वनादौ वा स्वासनस्थ उदङ्मुखः ॥ इति ॥

पट्टाकृतिना वर्तुलाकृतिना वा विहितपीठादौ स्थितः । **अत्रासनशब्देन** पद्मस्वस्तिकादीनि यान्यभ्यस्तानि[तानि] गृहीतानि । उक्तं च—

स्वस्तिकं गोमुखं पद्मं भद्रं मायूरकुक्कुटे ।
वीरं सिंहासनं कूर्मं चन्द्रपीठं दश क्रमात् ॥ इति सिद्धान्तशेखरे ।

लक्षणं तत्रैवोक्तमनुसन्धेयम् । **प्रागृजुपूर्वकायगलकः** प्रातःकालेऽवक्राकारेण स्थितोर्ध्वशरीरकरणसहितो **द्विजः** द्विजशब्देनात्र दीक्षादियुक्तः आलस्यादिरहित उच्यते । उक्तं च—

आलस्यादिविनिर्मुक्तो गुरुदेवेषु भक्तिमान् ।
निस्स्पृहस्सर्वविषये परं वैराग्यमाश्रितः ।
इत्यादिगुणसंपन्नो नाडीशुद्धौ प्रशस्यते ॥ इति ।

**लग्ने** सुमुहूर्ते, प्रथमारम्भविषयः । अथवा लग्नः **मननसंयमनयुक्तः** । **रेचयेत्** रेचनं कुर्यात् । उक्तं च—

उदरस्थसमीरस्य रेचनं (संज्ञिका)[सर्जनं] बहिः ।
बाह्यादापूरणाद्वायोः पूरकः प्राणसंयमः ।
रेचयेदुदरात्सम्यक् वायुं पिङ्गलया शनैः ।
पूरितस्योदरे वायोः धारणात्कुम्भकः स्मृतः ॥ इति ।

**नाडिषु** नाडिनिमित्तासु **शुद्ध्यै** शोधनं कर्तुं **मन्दं मन्दं** शनैश्शनैः **उदरं** जठरं **वामतः** वामनासापुटेन **सम्पूरयेत्** पूरणं कुर्यात् । उक्तं च—

इडया पूरयेत्सम्यक् बाह्यस्थमनिलं ततः । इति ।

**सेन्दोः** चन्द्रसहितवामभागस्य **बाह्यसमीरणेन** पूरितबाह्यस्थवायुना **मिहिरैः** द्वादशसंख्याकैः । "मिहिरारुणपूषाण" इति सूर्यपर्याये उक्तत्वात् । **तालैः** द्वादशमात्राभिः । मात्रालक्षणं द्विविधम्, जानुमण्डलस्य एकत्रिपरिभ्रमणभेदेन । तथा चोक्तं सिद्धान्तशेखरे—

वेष्टयित्वा त्रिधा जानुमण्डलं छोटिकां सकृत् ।
कुर्याद् द्वेधा भवेन्मात्रा कनिष्ठा कालमानतः ॥
आहुरन्येऽन्यथा मात्रां सकृज्जानुप्रदक्षिणम् ।
छोटिकां च सकृत्कुर्यात् एषा मात्रोनकालतः ॥ इति ॥

अत्र तालैरिति बहुवचनात् कनिष्ठादयो गृहीताः । द्वादशतालैः कनिष्ठः । चतुर्विंशत्या मध्यमः । अष्टचत्वारिंशता श्रेष्ठः । तथा चोक्तं सर्वज्ञानोत्तरे—

तालद्वादशको ज्ञेयः प्राणायामस्तु कन्यसः ।
मध्यश्चतुर्भिर्विंशत्या श्रेष्ठस्तद्द्विगुणो भवेत् ॥ इति ।

**क्रमात्कुम्भकं** पूरितवायोः पूरणोत्सर्जनत्यागस्वरूपं **शक्तिवशात्** सामर्थ्यानुसारेण कनिष्ठादिकालग्रहणात् **कृत्वा पिङ्गलार्कवाहात्** पिङ्गलनाडिगतार्किमार्गेण **तं** कुम्भकं **विरेचयति** विरेचनं कुर्वति पुरुषे ।

कुम्भितं रेचयेद्वायुं शनैः पिङ्गलया बुधः । इत्युक्तत्वात् ।

**निर्गर्भः** मन्त्रध्यानहीनप्राणायामो निर्गर्भः इत्युच्यते । तथा सिद्धान्तशेखरे—

अगर्भश्च सगर्भश्च मन्त्रहीनो ह्यगर्भकः ।
सगर्भो मन्त्रसंयुक्तः मन्त्राश्च प्रणवादिकाः ॥
प्रासादा जपहंसाश्च गायत्रीव्याहृतीमुखाः ॥ इति ॥

**खानामि**न्द्रियाणां **जयं कुरुते** । उक्तं च—-

हन्त्यगर्भोऽपि देवानां प्रचलत्वं प्रधावताम् । इति ।

देवानामिति मनस्सहितानामिन्द्रियाणामित्यर्थः । **जापयुतात्** मन्त्रजापसहितात् शिवचिन्तनात् **स** प्रसिद्धः **सगर्भः** प्राणायामः **निशोत्थं** रात्रिकृतं **सकलं** समस्तं **पापं निहन्ति** नाशयति । "प्रातर्निशाकृतं पापं दिनान्ते तु दिवाकृतम्" इत्युक्तत्वात् । **पुनः पुनः** दिवसे दिवसे योगसिद्धिपर्यन्तं योगाभ्यासं कुर्वतः, पुरुषस्य **प्रातस्सायमहस्सु** प्रातः प्रातःकालः, सायं सायङ्कालः मध्याह्नकालेषु क्रियमाणः एष योगाभ्यासः **तत्त्वादिसाक्षात्कृतिं** तत्त्वादीनां पृथिव्यादीनां साक्षात्कृतिं प्रत्यक्षेण तत्तत्स्वरूपतां **कुरुते** । योगाभ्यासमाचरतः पुरुषस्य पृथिव्यादिस्थितगन्धकाठिन्यादिगुणान् प्रकटीकरोतीत्यर्थः । पृथिवीसाक्षात्कारेण बाह्यगन्धे निस्पृहस्स भवति । अग्निसाक्षात्कारेण दिव्यरूपं जानाति, वह्निसन्तापो नास्ति । वायुसाक्षात्कारेण दिव्यस्पर्शं जानाति, अणिमादिगुणाष्टकं सिध्यति । गगनसाक्षात्कारेण दिव्यनादं जानाति, व्योमचारी भवति, इत्यादयो गुणाः योगाभ्यासेन भवन्तीति ॥ १२२ ॥

एवं प्रतिदिनं योगाभ्यासेन संयुक्तः पुरुषः स्वद्वादशान्तस्थितं परशिवं प्रत्यक्षेण पश्यतीत्याह—**हृद्व्योमेति** ।

**हृद्व्योमाम्बुजकर्णिकार्कशशभृद्बिम्बाग्निशक्त्यूर्ध्वगं**
**प्राणायामयुतं मृणाळविलसत्सूत्रप्रतीकाशकम् ।**
**ज्योतिस्तद्गतमानसोऽपि परतस्स्वद्वादशान्तस्थितं**
**स्वच्छाम्भस्सदृशप्रभं परशिवं योगी चिता पश्यति ॥ १२३ ॥**

**योगी** योगो नाम शिवात्मनोरैक्यस्य प्रथमकालसम्बन्धः । तादृशयोगयुक्तो योगी **प्राणायामयुतः** पूरककुम्भकरेचकसहितं यथा भवति, तथा युक्तस्सन् **हृद्व्योमाम्बुजकर्णिकार्कशशभृद्बिम्बाग्निशक्त्यूर्ध्वगं,** हृद्व्योमाम्बुजस्य हृदयकुहरकमलस्य कर्णिकायां संस्थितार्कस्सूर्यः, शशभृत् चन्द्रः, तयोः बिम्बयोः मण्डलयोरुपरि विद्यमानाग्निशक्त्यूर्ध्वगं अग्निमण्डलशक्तिमण्डलयोरूर्ध्वस्थितं **मृणाळविलसत्सूत्रप्रतीकाशक** मृणाले बिसे विलसत्सूत्रस्य देदीप्यमानं प्रतीकाशकं प्रकाशरूपं **ज्योतिः** तेजोरूपं हृदयाम्बुरुहसंस्थं परञ्ज्योतीरूपं परापरमित्युक्तत्वात् , **तद्गतमानसः** हृदयकमलस्थितज्योतीरूपे शिवे प्रत्यक्षेण गतमानसस्सन् **परतः** हृदयकमलादूर्ध्वतः **द्वादशान्तस्थितं** आत्मीयद्वादशान्ते विद्यमानं **स्वच्छाम्भस्सदृशप्रभं** निर्मलोदकसमानकान्ति **परशिवं चिता** ज्ञानेन **पश्यति** प्रत्यक्षेण दृष्टो भवतीत्यर्थः ॥ १२३ ॥

प्रातःकालाद्युपाधिना शिवस्मरणक्रममाह—**हृत्पद्म इति** ।

**हृत्पद्मे प्रातरर्कोदयनिवहनिभं मध्यनाड्यां विचिन्त्यं**
**मध्याह्ने भ्रूसरोजे परमशिवजचिद्रूपमिन्दुप्रकाशम् ।**
**सायाह्ने तूर्ध्वपद्मे ह्यमृतजलनिधिद्योतनं स्वोत्थनादं**
**रात्रेरर्धेऽप्रमेयं त्वविकलमचलं द्वादशान्ते महस्तत् ॥ १२४ ॥**

**हृत्पद्मे** हृदयकमले । **प्रातः** प्रातःकाले । सूर्योदयात्पूर्वं द्वित्रिचतुष्कपञ्चनाडिकापर्यन्तं कालः प्रातः कालः । **अर्कोदयनिवहनिभं** सूर्योदयसमूहसमप्रभं, अनेकारुणवर्णमित्यर्थः । **मध्यनाड्यां** सुषुम्नायां **विचिन्त्यं** ध्यातुं योग्यं **मध्याह्ने भ्रूसरोजे** भ्रूकमले **परमशिवजचिद्रूपं** परमशिवजं परशिवस्वरूपम् ।

अनेन बिम्बस्य निमित्तकारणस्वरूपमुक्तम्। चिद्रूपं ज्ञानक्रियास्वरूपं, **इन्दुप्रकाशं** अनेकचन्द्रवद्देदीप्यमानं विचिन्त्य, **सायाह्ने ऊर्ध्वपद्मे** ब्रह्मरन्ध्रस्थितकमले **अमृतजलंनिधिद्योतनं** अमृतसमुद्रवत् प्रकाशमानं, **स्वोत्थनादं,** आत्मीय-मूलाधारोत्थितनादस्वरूपम्। अनेन ओंकारसहितं प्रासादमन्त्रस्वरूपमुक्तं भवति। **रात्रेरर्धे** अर्धरात्रे **अप्रमेयं** मनोबुद्ध्यादिभिः ज्ञातुमयोग्यं अविकलमत्यन्तनिष्कलं **अचलं** चलरहितं, अनेन स्वदृक्क्रियाशक्तेरुद्योगाधिकार-व्यापाररहितत्वमुक्तम्। संहृतसर्वकार्यत्वाद्द्वादशान्ते एवंविधं **तत्** प्रसिद्धं **महः** तेजोरूपं चिन्त्यम्॥ १२४॥

अथ समलात्मनां जाग्रदादिपञ्चावस्थाक्रममाह—**बाह्येति**।

**बाह्यान्तःकरणैरणोः स्वविषयज्ञानं तु जाग्रच्च त-**
**त्स्वप्नोऽन्तःकरणस्थवृत्तिविषयज्ञानं सुषुप्तिः परम्।**
**देहे चेन्द्रियवृत्तिहीनमवचोग्राह्या मतिस्तुर्यकं**
**देहाक्षोपरतौ स्वचिन्मतिरथातीतं शिवत्वोदयः॥ १२५॥**

**अणोस्**समलात्मनः **बाह्यान्तःकरणैर**त्र बाह्यकरणैः चक्षुश्श्रोत्रादिभिरन्तः-करणैर्मनोबुद्ध्यहङ्कारैरत्र प्रथममात्मनोऽन्तःकरणैःसहितं तदनन्तरं बाह्यकरणै-स्सह **स्वविषयज्ञानं** स्वेषां चक्षुरादीनां विषयज्ञानं ग्राह्यभूतरूपादिज्ञानं, **तत्** प्रसिद्धं **जाग्रत्** जाग्रदवस्था। **अन्तःकरणस्थवृत्तिविषयज्ञानं** मनोबुद्ध्यहङ्कारेषु विद्यमानप्रवर्तमानविषयज्ञानं **स्वप्नः** स्वप्नावस्था। **परम**न्तःकरणेभ्यो व्यतिरिक्तं **सुषुप्ति**र्निद्रावस्था। **देहे** शरीरे **इन्द्रियवृत्तिहीनं** चक्षुरादीन्द्रियमानसादीन्द्रिय-प्रयत्नव्यतिरिक्तं **अवचोग्राह्या** अवचः वचनाभावः, ग्रहीतुं योग्या **मतिः** मतिशब्दे-नात्र प्राणो विवक्षितः प्राणयुक्तात्मेत्यर्थः। **तुर्यकं** तुर्यावस्था **देहाक्षोपरतौ** देहे शरीरे विद्यमानेन्द्रियमानसादिप्राणादीनां उपरतौ चलनादिलयने **स्वचिन्मतिः** आत्मज्ञानमात्रं प्राणेनायुक्तात्ममात्रमित्यर्थः। **अतीतं** तुर्यातीतावस्था। एवं समलात्मनः पञ्चावस्थाः। अथ निर्मलात्मनः **शिवत्वोदयः** शिवस्वरूपत्वप्राप्तिः। तथाऽचिन्त्यागमे समलस्य लक्षणमुक्तम्—

मुखे जाग्रमिति ज्ञेयं स्वप्नं तु हृदयान्तकम्।
हृदयादि समारभ्य नाभ्यन्तं तु सुषुप्तिकम्॥

तस्यैवाधस्तुर्यकं स्यात् तुर्यातीतं तु लिङ्गके ।
जाग्रादिस्थानमेवं हि प्रवर्तकमिहोच्यते ॥

श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं चैव तु पञ्चमम् ।
शब्दस्स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः ॥

वाक्पाणी पादपायू च उपस्थं चेह पञ्चमम् ।
वचनादानगमनविसर्गानन्दपञ्चकम् ॥

प्राणस्त्वपानो व्यानश्च उदानस्तु समानकः ।
नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः ।
मनो बुद्धिरहङ्कारः चित्तं क्षेत्र(ज्ञ) एव च ॥

पञ्चत्रिंशच्च वर्तन्ते जाग्रस्थानं विनिर्दिशेत् ।
शब्दादिवचनादीनि प्राणादीनि मनादिकम् ॥

अत्र प्राणादिशब्देन नागादयश्च गृह्यन्ते । तत्कार्याणामुद्गारादीनां दर्शनं स्वप्ने विद्यमानत्वात् ।

एते चरन्ति वै स्वप्ने शेषाण्येव तु वर्जयेत् ।
जाग्रद्विषयभुक्तिश्च प्रतिभा स्वप्न एव च ॥

प्राणयुक्तं मनश्चैव क्षेत्रज्ञश्च सुषुप्तिकः ।
आत्मा प्राणस्तु तुर्येण तुर्यातीतो विसर्गकः ॥ इति ।

अत्र शिवत्वोदयशब्देन निर्मलात्मनः जाग्रादिपञ्चावस्था उक्ता भवति । तथा ईशानदेवगुरुणाप्युक्तम्—

बीजस्योच्चारणं जाग्रं स्वप्नो बिन्दुपरिग्रहः ।
सुषुप्तिर्नादयोगस्तु तुर्यं शक्तिसमागमः ।
तुर्यातीतं लयं शान्तं परे महसि पठ्यते ॥ इति ॥ १२५ ॥

**॥ इति अनन्तशम्भुकृतायां सिद्धान्तसारावलि—**
**व्याख्यायां योगपादस्तृतीयः समाप्तः ॥**

—: × :—

## ॥ अथ चर्यापादः ॥

अथ चर्यापादं वक्तुकामः तत्रादौ कामिकाद्यागमानां शिवभेदरुद्रभेद-संज्ञाविधानमाह—**आत्मान इति** ।

**आत्मानो दश सृष्टिपञ्चमगतान् कृत्वा शिवान् केवलां-**
**स्तेषां मन्त्रपतिप्रबोधपरतो ज्ञानं तथाभज्य तत् ।**
**साक्षादेव उपादिदेश स शिवश्शैवास्ततश्चागमा**
**रुद्रांश्चाष्टदशावबोध्य कथितास्तैरागमाश्चापरे ॥ १२६ ॥**

परमेश्वरज्ञानं द्विप्रकारकम् अवबोधरूपं शब्दरूपञ्चेति । तत्रानादिमल-रहितमनादिनिधनं सर्वार्थप्रकाशकं सर्वानुग्राहकं शिवं शिवज्ञानात्मकमवबोधरूपं, परमशिवबोधरूपं परशिवे विद्यते । शब्दरूपं तु शास्त्रात्मकमेव । परमकारुणिकः परमेश्वरः सृष्टिकाले स्वात्मनि विद्यमानं अवबोधरूपमेव शब्दरूढं कृत्वा सर्वानु-जिघृक्षया गुरुपरम्परया योग्येषु प्रवर्तयति । गुरुपरम्पराक्रमश्चात्र द्विप्रकारः । महौघक्रमलक्षणः गुरुसंहिताक्रमलक्षणः शास्त्रावतारः । अत्र समये प्रतिसंहितं गुरूर्ध्वसृष्ट्या सृष्टान् । अत एव **केवलान्** शुद्धान् अभिव्यक्तसर्वज्ञत्वादिधर्मयुक्ता-नित्यर्थः । अत एव **शिवान्** शिवस्वरूपान् सदाशिवपदस्थान् । **दशात्मनः** दशसंख्यानात्मजान् प्रणवादीन् सृष्ट्वा, स्मरणमात्रेण कृत्वा एतेषां प्रणवादि-दशानां सदाशिवपदस्थितिरिति सिद्धम् । तथोक्तं श्रीमत्स्वतन्त्रे—

"सकलस्तु वृतो देव ओङ्काराद्यैरनुक्रमात्" इति । ओङ्काराद्यैः प्रणवाद्यैः इत्यर्थः । **तेषां** प्रणवादि दशात्मजानां **मन्त्रपतिप्रबोधपरतः**, मन्त्रपतीनां अन-न्ताद्यष्टविद्येश्वराणां, प्रबोध आत्मज्ञानोपदेशः स एव पर उत्कृष्टः पौर्वीक इत्यर्थः । तस्मात्परतः विद्येश्वरप्रबोधनानन्तरं प्रणवाद्यणूनां उपदेशः कृत इत्यर्थः । **ज्ञानं** नादरूपशिवज्ञानम् । उक्तं च—

अदृष्टविग्रहाच्छान्ताच्छिवात्परमकारणात् ।
नादरूपं विनिष्क्रान्तं शास्त्रं परमदुर्लभम् ॥ इति ।

**तथा** दशप्रकारेण **भज्य** भागं कृत्वा, यदुक्तं स्वायम्भुवे—

अथात्ममलमायाख्यकर्मबन्धविमुक्तये ।
व्यक्तये च शिवत्वस्य शिवाज्ज्ञानं प्रवर्तते ॥

एकमेव शिवज्ञानं विभिन्नं बहुधा पुनः ।
दशाष्टादशधा भूयो देशान्तरविसर्जितम् ॥ इति ।

**देवः** सर्वत्र प्रकाशमानः **स** शिवः परशिवः परमशिवः **साक्षात्प्रत्यक्षेण उपादिदेश** कामिकादि दशभेदेनोपदेशं कृतवान् । **ततः** वक्तृश्रोतॄणां शिवस्वरूपत्वात् **शैवाः आगमाः** शिवसंज्ञया विहिताः कामिकादयो दशागमाः ।

तथा किरणे—

सृष्ट्यनन्तरमेवेशः शिवान् सृष्ट्वा दशात्मजान् ।
ज्ञानमेकं विभज्याशु तेषां तत्संख्ययावदत् ।
कामिकं प्रणवाख्यस्य सुधाख्यस्य च योगजम् ॥

दीप्ताख्यस्याप्यचिन्त्यं तु कारणाख्यस्य कारणम् ।
अजितं सुशिवाख्यस्य ईशाख्यस्य सुदीप्तकम् ॥

सूक्ष्मं तु सूक्ष्मसंज्ञस्य कालस्यापि सहस्रकम् ।
सुप्रभं यद्गणेशस्य अंशुसंज्ञस्य चांशुमान् ॥

एवं प्राधानिकः प्रोक्तः पुनरन्यो गुरुक्रमः ।
प्रणवात् त्रिकलः प्राप्तः कामिकं त्रिकलाद्धरः ॥

इत्यादिना द्रष्टव्यः । **अष्टदश**—अष्टाधिकदशसंख्याकान् **रुद्रान्** अनादिरुद्रनामधेयादीन् **अवबोध्य,** ज्ञानयुक्तानीश्वरतत्त्वस्थितानेवानुगृह्य, तत्संख्यया, एकमेव अवबोधज्ञानं यथाधिकारं शब्दारूढं कृत्वा क्रियादिभेदेन **कथिताः**-शिवेनवोक्ताः । **तैः** शिवभट्टारकैः रुद्रान् श्रोतृत्वेन विधाय कथनात् **अपरे आगमाः** रुद्रसंज्ञया विहितागमाः विजयादयोऽष्टादश । अत्रापर इत्युक्तत्वात् शिवभेदरुद्रभेदयोर्यथाक्रमेण परापरत्वमुक्तमिति द्योतितं भवति ॥

तथा किरणे—

दशाष्टसंख्ययाप्यन्यो रुद्रभेदोऽपरो मतः ।
दशाष्टसंख्यया रुद्रान् पूर्वमुत्पाद्य बुद्धिमान् ॥

शिवस्तत्संख्ययैवेह पुनस्तान् बोधयेत्खगः ।
रुद्रस्यानादिसंज्ञस्य विजयं तेन भाषितम् ॥

पारमेशं महातन्त्रे श्रीरूपस्य प्रभाषितम् ।
निश्वासं यद्दशार्णस्य प्रोद्गीतं नाम शूलिनः ॥

इत्यादिना बोद्धव्यम् । शिवभेदस्य कामिकादेः प्रत्येकं त्रयः श्रोतारः । रुद्रभेदस्य विजयादेः द्वौ श्रोतारौ । उभयसम्मेळनेन षडधिकषष्टिसंख्याकाः श्रोतारः "षट्षष्टिभिः क्रमेणैव शिवाज्ञया" इत्युक्तत्वात् । एतेषां नामधेयानि मूलागमेषु द्रष्टव्यानि ॥ १२६ ॥

शैवागमानां वक्तृश्रोतृभेदेन विस्तृताः सम्बन्धाः षट्प्रकाराः सन्तीत्याह—**सम्बन्धा इति ।**

**सम्बन्धास्तु परोऽणुनाथशिवयोरानन्तसोम्यो महान्**
**सोमाद्देवगतोऽन्तराळविदितो दिव्यो मुनिष्वागतः ।**
**देवाद्दिव्यगतोऽप्यदिव्य ऋषितोऽप्युक्तो मुनीन्द्रान्नरे**
**तस्माच्छिष्यगतोऽप्यदिव्य इति षट् शैवागमानां विदुः ॥ १२७ ॥**

**अणुनाथशिवयोः** । अणुनाथः सप्तकोटिसंख्याकानां नाथः अनन्तेश्वरः शिवः सदाशिवभट्टारकः । तयोः श्रोतृवक्तृभेदेन आगमानां सम्बन्धः **परः** पर इति नामधेयेनोक्तः । सम्बन्धः प्रथमः । **आनन्तसोम्यः** सोमशब्देनात्र श्रीकण्ठ उच्यते । अनन्तेश्वरो वक्ता श्रीकण्ठः श्रोता एतयोः सम्बन्धः **महान्** इति नामधेयेनोक्तः । द्वितीयस्सम्बन्धः । तथोक्तं श्रीमद्रौरवे—

जगतः कारणं देवमनन्तेशं परं गुरुम् ।
तेनोक्तं परमेशेन श्रीकण्ठाय महात्मने ॥ इति ।

**सोमात्** श्रीकण्ठात् **देवगतः** इन्द्रादिदेवगतः **अन्तरालविदितः** अन्तराळ इति नामधेयेन विदितः उक्तस्तृतीयस्सम्बन्धः । **मुनिष्वागतः** इन्द्रादिदेवेभ्यः ऋषिषूक्तः **दिव्यः** दिव्य इति नामधेयेन विहितश्चतुर्थस्सम्बन्धः । **देवात् दिव्यगतः** वक्तृभूतदेवात् श्रोतृभूतमुनिषु प्राप्तत्वात् दिव्य इत्युच्यते । **ऋषितः अदिव्यः** वक्तृभूतऋषिसकाशात् श्रोतृभूतनरश्रेष्ठेषु प्राप्तत्वाद्दिव्यगतोऽप्यदिव्य इत्युच्यते अत एव **मुनीन्द्राद्देवर्षेः नरे** मनुष्यमुख्यर्षौ उक्तः सम्बन्धः दिव्यादिव्य इति पञ्चमः प्रोक्तः । **तस्मान्नरर्षेः शिष्यगतः** स्वशिष्यप्राप्तसम्बन्धः अदिव्य इति षष्ठः । इत्येवंप्रकारेण **शैवागमानां** कामिकादीनां सम्बन्धः षट्प्रकारः । **विदुः** उक्तवन्तः पूर्वाचार्यैः शास्त्रार्थविचारेणोक्त इति शेषार्थः ।

ननु कामिकादितन्त्रेषु प्रणवादयः श्रोतार इति श्रूयते । तत्कथं शिवानन्तयोः सम्बन्धः इति शङ्कायाः परिहारः । अत्र ग्रन्थे महौघक्रमलक्षणसम्बन्धः प्रोक्तः । एवमेव प्रतिसंहितं गुरुक्रमलक्षणसम्बन्धः संयोजनीयः ।

अनन्तेश्वरप्रबोधनानन्तरं प्रणवादीनां प्रबोधनात् । अत एव सम्बन्धो द्विविधः । अनन्तेश्वरादिसम्बन्धः प्रणवादिसम्बन्ध इति । शिवप्रणवयोः परस्सम्बन्धः । प्रणवत्रिकलयोर्महान् । त्रिकलहरयोरन्तरालः । हरदेवयोर्दिव्यः । देवऋष्योर्दिव्यादिव्यः । ऋषिमनुष्ययोरदिव्य इति । षड्विधः सम्बन्धः । एवं शिवभेदानामूहनीयः रुद्रभेदानां श्रोतृद्वयेन सम्बन्धः एव । शिवानादिरुद्रयोः परः । अनादिरुद्रपरमेशयोर्महान् । परमेशदेवयोर्दिव्यः । देवऋष्योर्दिव्यादिव्यः । ऋषिमनुष्ययोरदिव्य इति । एवमापरमेश्वरादविच्छिन्नसम्प्रदायदर्शनात्परशिवप्रणीतागमस्य प्रामाण्यं सिद्धम् । तथा मतङ्गे :—

" प्रमाणमेकं तद्वाक्यं तथ्यमीश्वरभाषितम् " । इति । नित्यत्वेनागमस्य प्रामाण्यं वदन्ति केचित् । तदसत् । अवबोधरूपमेव नित्यम् । तस्यैव शब्दादि रूढत्वेन कृतकत्वात् कृतकस्यानित्यत्वं सिद्धम् । अभिनवविरचितवाक्यरचना वदागमस्य कृतकत्वमेव नास्तीति केषाञ्चिन्मतम् । तदप्यसत् । अवबोधरूपस्य-शब्दारूढत्वेन कृतकत्वं प्रत्यक्षेण दृश्यते । प्रत्यक्षापलापिनां तेषां मिथ्याज्ञानत्वात् । अनीश्वरत्वप्रसङ्गाच्च । अत एव परमाप्तप्रणीतागमवचनस्य प्रामाण्यमेवेति सिद्धम् ॥ १२७ ॥

शिवागमानां मध्ये पूर्वे दश शिवभेदाः । परे अष्टादश रुद्रभेदा इति अष्टाविंशतितन्त्राणां नामधेयान्याह—शैवा इति ॥

**शैवाः कामिकयोगजेऽजितमथो चिन्त्यं तु दीप्ताह्वयं**
**सूक्ष्मं कारणमंशुमांश्च दशधा साहस्रकं सुप्रभम् ।**
**रौद्रास्ते विजयश्च रौरवमथो निश्वासमाग्नेयकं**
**सन्तानं किरणाख्यसिद्धविमला[ः] श्रीचन्द्रभासं परम् ॥ १२८ ॥**

**उद्गीतं ललितं च माकुटमथो श्रीनारसिंहं तथा**
**श्रीस्वायम्भुवपारमेशमुखयुग्बिम्बानि भद्राह्वयम् ।**

**तेनाष्टादशसंख्ययोर्ध्वमुखतः साक्षात्सदेशेन ते**
**प्रोक्तास्सो हि पराप्त एव निखिलोत्तीर्णोऽखिलज्ञानवान् ॥ १२९ ॥**

कामिकयोगजेऽजितमथो चिन्त्यमिति ग्रन्थकारेणोक्तम् । तथापि अत्र ग्रन्थे अन्वयमुखेनागमानां पौर्वापर्यक्रमपाठो ज्ञातव्यः । छन्दोभङ्गानुरोधेनोक्तत्वात् । **कामिकयोगजे** कामिकमिति योगजमिति **चिन्त्य**मिति **कारण**मिति **अजित**मिति **दीप्त**मिति **सूक्ष्म**मिति **साहस्र**मिति **अंशुमा**निति **सुप्रभेद**मिति **दशधा** दशसंख्याप्रकारेण **शैवाः** शिवभेदा इति प्रोक्ताः । **विजय**मिति **निश्वास**मिति, **स्वायम्भुव**मिति, **आग्नेयक**मिति अनलतन्त्रं **भद्राह्वय**भेदेन वीरतन्त्रमुच्यते । तथा मृगेन्द्रे :—

स्वायम्भुवं तथाग्नेयं वीरभद्रं सरौरवम् । इति ।

**माकुट**मिति **विमल**मिति **चन्द्रभास**मिति चन्द्रज्ञानमुच्यते **मुखयुग्बिम्ब**मिति मुखबिम्बमुच्यते । **उद्गीत**मिति प्रोद्गीतमुच्यते । **ललित**मिति **सिद्ध**मिति **संतान**मिति **नारसिंह**मिति शर्वोक्तमुच्यते । सोमदेवेन नृसिंहस्योक्तत्वात् । तथा कामिके :—

सोमदेवस्य शर्वोक्तं द्विलक्षेणैव संख्यया ।
नृसिंहः प्राप्तवान् सोमाद्भेदः पञ्चविधो भवेत् ॥ इति ॥

**पारमेश्वर**मिति **किरण**मिति **पर**मिति वातुलमुच्यते । वातुलस्य द्वादशभेदे परोहितत्वेनोक्तत्वात् नामैकदेशे नामग्रहणम् । अष्टादशसंख्यया ते प्रसिद्धाः **रौद्रा** रुद्रभेदा इति प्रोक्ताः । तथा कारणे—

कामिकं योगजं चिन्त्यं कारणं त्वजितं तथा ।
दीप्तं सूक्ष्मं सहस्रं च ह्यंशुमान् सुप्रभेदकम् ॥
विजयं चैव निश्वासं स्वायम्भुवमथानलम् ।
वीरं च रौरवं चैव मकुटं विमलं तथा ॥
चन्द्रज्ञानं च बिम्बं च प्रोद्गीतं ललितं तथा ।
सिद्धं सन्तानशर्वोक्तं पारमेश्वरमेव च ।
किरणं वातुलं त्वेतास्त्वष्टाविंशतिसंहिताः ॥
तेषु पूर्वं दश प्रोक्तं शिवभेदेति संज्ञिकम् ।
दशापराष्टकं तत्र रुद्रभेदमिति स्मृतम् ॥ इति ।

**तेन प्रसिद्धेन सदेशेन** सदाशिवेनो**र्ध्वमुखतः,** ईशानस्योर्ध्वमुखात्**साक्षात्** प्रत्यक्षं ते कामिकादयः प्रोक्ताः । ननु कामिकाद्यष्टाविंशतितन्त्राणां कथमीशानमुखात् उत्पन्नत्वम् । मूलागमेषु पञ्चवक्त्रेषु उत्पन्नमित्युक्तत्वात् । तथा कारणे—

कामिकाद्यजितान्ताश्च सद्योजातमुखोद्भवाः ।
दीप्तादिसुप्रभेदान्ता वामदेवमुखोद्भवाः ॥
विजयाद्याश्च वीरान्ता पञ्चैतेऽघोरसम्भवाः ।
रौरवान्मुखबिम्बान्ताः पुरुषाख्याननोद्भवाः ॥
प्रोद्गीताद्यष्टतन्त्राणि चेशानस्य मुखोद्भवाः ॥ इति ॥

अत्र सद्यादिपञ्चवक्त्राणां प्रत्येकं पञ्चवक्त्राणि विद्यन्त इत्यागमेषूक्तत्वात् ईशानवक्त्रसम्बन्धसद्योजातवक्त्रेषूत्पन्नमिति ऊर्ध्वमुखत इत्युक्तम् ।

तथा कामिके—

सद्यवाममहाघोरपुरुषेशानमूर्तयः ।
प्रत्येकं पञ्चवक्त्रास्स्युः तैरुक्तं लौकिकादिकम् ॥
पञ्चविंशतिभेदेन स्रोतोभेदः प्रकीर्तितः ।
लौकिकं वैदिकञ्चैव तथाध्यात्मिकमेव च ।
अतिमार्गं च मन्त्राख्यतन्त्रमेकमनेकधा ॥
तेष्वेव मन्त्रतन्त्राख्यं सदाशिवमुखोद्गतम् ।
ईशानवक्त्रादूर्ध्वस्थाज्ज्ञानं यत्कामिकादिकम् ।
दशाष्टादशभेदेन शिवरुद्रावतारकैः ॥ इति ।

सर्वज्ञत्वयुक्तशिवप्रणीतमाप्तवाक्यागमज्ञान(मे)[स्यै]व प्रामाण्यमित्याह**—सो हीत्यादिना । सो हि** प्रसिद्धभूतसदाशिवः **पराप्तः** अतिशयेनाप्तः । आप्त इति यथाभूतस्यार्थस्य उपदेष्टा पुरुषः । स्वाज्ञानादेवायमर्थोऽयथाभूतार्थ इति उपदेष्टा पुरुषोऽनाप्त एवेति द्योतनार्थं परशब्दोऽत्र विहितः । पशुदृग्भिर्यथाभूतार्थोऽयमिति निश्चित्य उदीरितत्वात् अनादिमलसम्बन्धात् सर्वे पशव इत्युच्यन्ते । अयं तावत्पशुपतिरित्युक्तः । एवकारेणायं परासांऽन्ये त्वनाप्ता इति द्योतितं भवति । इममेवार्थं द्रढयति **निखिलोत्तीर्ण** इति । निखिलेभ्यः अनादिभूतमलमायादि-

पाशेभ्यः उत्तीर्णः उपरि विद्यमानः। मलादिसम्बन्धरहित इति यावत्। अत एवाखिलज्ञानवान्। सर्वज्ञानयुतः यथार्थेन सर्वं जानातीत्यर्थः।

तथा मृगेन्द्रे—

वेदान्तसांख्यसदसत्पादार्थिकमतादिषु।
ससाधना मुक्तिरस्ति को विशेषश्शिवागमे॥

प्रणेतुस्सर्वादर्शित्वात् न स्फुटो वस्तुसङ्ग्रहः।
उपायास्सफलास्तद्वत् शैवे सर्वमिदं परम्॥ इति।

परमाप्तशिवप्रणीतागमज्ञानमेव परं निश्रेयसहेतुः। यदुक्तं रौरवे—

पशूनां भुक्तिमुक्त्यर्थमाप्तः पशुपतिश्शिवः।
यदाप्तवाक्यमकरोत् आप्तवाक्यं तदागमः॥ इति॥

तथा च वायुपुराणे उपमन्युकृष्णसंवादे—

शिवागमोक्तं यज्ज्ञानं तदेव ज्ञानमुत्तमम्।
श्रीकण्ठेन शिवेनोक्तः शिवायै च शिवागमः॥
शिवाश्रितानां कारुण्याच्छ्रेयसामेकसाधनम्॥ इति॥

तस्मादागमज्ञानेन मुक्तो मलादिपाशनिर्मुक्तः। अन्यशास्त्रोक्तज्ञानेन मुक्तः पशुरेव। तच्छास्त्रप्रणेतॄणां पशुत्वात्। तथा कामिके—"अन्यशास्त्रेषु ये मुक्ताः सिद्धान्ते पशवो मताः"॥ इति॥ १२९॥

अथ सौरचान्द्रपवित्रकालनिर्णयमाह—**अर्क इति।**

**अर्के युग्मगते हरिर्निजतिथौ शेते सितायां ततः**
**सूत्रार्चा त्रिषु किन्तु षट्स्वधिकता मासेषु दर्शद्वये।**
**सन्धिस्थैकतमे द्विजादिषु यदा शेते तदा कर्कटे**
**तद्वद्दर्शयुगं भवेद्यदि तदा सिंहे पवित्रोद्यमः॥ १३०॥**

**अर्के** सूर्ये **युग्मगते** मिथुनराशिं प्राप्ते सति हरिर्नारायणः। **सितायां** मिथुनगतशुक्लपक्षे **निजतिथौ** द्वादश्यां **शेते** निद्रां करोति। **ततः** हरिस्वापानन्तरं **सूत्रार्चा** पट्टकार्पासतन्त्वादिभिर्निर्मितपवित्रैः क्रियमाणपूजा कर्तव्येति शेषः। अनेन नारायणस्वापकालात्पाक्तनका(लो [ले] पवित्रकरणनिषेध इति सूचितः। तथा

मोहादज्ञानतो वापि चाप्रसुप्ते जनार्दने ।
पवित्रं कारयेद्यस्तु स पापी पापमोहितः ॥

त्रिपञ्चदिनमनाहारो जपेत्पञ्चायुतं हरः ॥ इति ।

मोहशूरोत्तरेः—नन्वल लोके तावत् आषाढशुक्लपक्षद्वादश्यां विष्णुस्वापः प्रसिद्धः । मिथुनस्थितेऽर्के ज्येष्ठमासगते सति मि(त्र)[त्रे]मिथुनगता शुक्लद्वादशी भवति । तत्र हरिस्वापः कथं विधीयत इति । अत्र परिहारः, अर्के युग्मगत इति ऊर्ध्वमिथुनोऽत्र विवक्षितः । नत्वधोमिथुनः । अत्राषाढमासगतमिथुनराशिः सौरत्वेनोर्ध्वमिथुन इत्युच्यते । ज्येष्ठमासगतमिथुनराशिः चान्द्रत्वेनाधोमिथुन इत्युच्यत्ते । तथा (श्रीपति)रत्नमालायामुक्तम्—

"स्वापोर्ध्वमिथुने शुक्लद्वादश्यां नाधिके हरेः" इति । अत एव उत्तरायणे माघादिषण्मासाः सौराः चान्द्रा इति द्विप्रकाराः । तथा दक्षिणायने श्रावण्यादिषाण्मासाः । माघमासो यदा मकरस्थितार्केण युक्तः, तदा सौरमानत्वेन मुख्यः । यदा माघमासः कुम्भरविणा युक्तः तदा चान्द्रमासत्वेन मुख्यः । एवं सर्वेषां मासानां सौरचान्द्रत्वं योज्यम् । तथा चोक्तं निश्वासकारिकायाम्—

माघमासादितः कृत्वा चाषाढान्तेन शोभने ।
विज्ञेयं लौकिकं कालं उत्तरायणमुत्तमम् ॥

श्रावणीमादितः कृत्वा पुष्यान्तेन तु शोभने ।
विज्ञेयं लौकिकं कालं दक्षिणायनमुत्तमम् ॥ इति ॥

माघादिमासानां मकरादिसंज्ञा च तत्रैवोक्ता—

यस्मिन् राशौ स्थितो भानुः माघमादि करोति सः ।
मकरः कुम्भमीनौ च मेषश्चैव वृषस्तथा ॥

मिथुनं कथितष्षष्ठः राश्यष्षाण्मासि कीर्तिताः ।
कर्कटः सिंहकन्ये च तुलावृश्चिक एव च ॥
धनुश्चैव समाख्यातं दक्षिणे भास्कराश्रयः ॥ इति ।

तथा वाग्भटाख्ये वैद्यग्रन्थे :—

मासैर्द्विसंख्यैर्माघाद्यैः क्रमात् षड् ऋतवः स्मृताः ।
शिशिराद्यैस्त्रिभिस्तैस्तु विद्यादयनमुत्तरम् ॥ इति ।

तथा नैघण्टुकैरपि :—

द्वौ द्वौ माघादिमासौ स्यादृतुस्तैरयनं त्रिभिः ।
अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः ॥ इति ।

तथा आत्रेयसंहितायाम् :—

शिशिरश्च वसन्तश्च ग्रीष्मश्चाप्युत्तरायणे ।
वर्षाश्शरच्च हेमन्तो दक्षिणायनमध्यगाः ॥ इति ।

ऋतवश्च द्विप्रकाराः सौराश्चान्द्रा इति । उक्तं च :—

वसन्ता(द्)[द्यृ]तवो द्वेधा चान्द्रास्सौराश्च चन्द्रगाः ।
दर्शाद्या अथ मीनाद्या मेषाद्या वा विवस्वतः ॥ इति ।

अत्र मेषादिसङ्क्रान्तिचारात् रवेः सौरमासः चान्द्रमासस्तु तत्तन्मास-शुक्लपक्षपौर्णमासीयुक्ततत्तन्नक्षत्रप्रधानभूतपौर्णमासीमध्योपरिवर्तमानामावास्यान्तः ।

तथा अमरसिंहेनोक्तम् :—

पुष्ययुक्ता पौर्णमासी पौषी मासी तु यत्र सा ।
नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे ॥ इति ।

दर्शावधिं मासमुशन्ति चान्द्रं सौरं तथा भास्करराशिचारात् । इति सिद्धान्तशेखरे । तथा ज्योतिषसङ्ग्रहे :—

मेषादिस्थे सवितरि यदा दर्शः प्रवर्तते ।
तदन्तस्थश्चान्द्रमासः स च चैत्रादिकः स्मृतः ॥ इति ।

अत एवात्र चान्द्राषाढः कर्कटः । सौराषाढस्तु मिथुनराशिरिति प्रतिपादितः ।

शशिमासं च सौरं च द्वौ विज्ञेयौ विशेषतः ।
चान्द्रेण व्यवहारार्थं सौरेण शुभकर्मसु ॥

इति ज्योतिर्विदां नियमात् । एवं सौरत्वेन विहितेषु मिथुनकर्कटकसिंहराशियुक्तेषु आषाढश्रावणभाद्रपदमासाख्येषु उत्तममध्यमाधमत्वेन पवित्रारोपणं कार्यमिति त्रिष्वित्युक्तम् । "आषाढादित्रयो मासा ज्येष्ठमध्यमकन्यसाः" । इत्युक्तत्वात् । त्रिष्विति नियमात् तदूर्ध्वमासपवित्रकरणं निषिद्धमिति सूचितम् । "भाद्रादूर्ध्वं न कुर्वीत सिद्धान्ते दोषभाग्भवेत् । इति श्रुतेर्विद्यमानत्वात् । अत एव

कन्याराशौ प्रायश्चित्तपूर्वमेव पवित्रं करणीयम् । तुलायां कदापि न कुर्यात् । तथा षट्सहस्रिकायाम्—

आषाढादित्रयो मासाः सुप्त एव जनार्दने ।
शुक्लपक्षेऽथवा कृष्णे प्रशस्तास्सूत्ररोहणे ॥

रोगाभिवृद्धिसंयुक्तः प्रवासी राजपीडितः ।
उक्तमासत्रये यस्तु न कुर्यात् सूत्ररोहणम् ॥

असौ कन्यागते भानौ जप्त्वा दक्षाणुना युतम् ।
कुर्यात्पवित्रकं शम्भोः तुलायां न कथञ्चन ॥ इति ।

तथान्यत्रापि—

आषाढादित्रये दैवादविधाय पवित्रकम् ।
लक्षद्वयमघोरस्य जप्त्वा चान्द्रायणं चरेत् ॥ इति ।

किन्त्वितिपदेन पवित्रकालनिर्णये विशेषार्थो द्योतितः । नारायणस्वापकालान-न्तरमेव पवित्रस्य विहितत्वात् । स्वापकालस्त्वधिकमासरहिते सौरत्वेन विहित-मिथुनगताषाढशुक्लपक्षद्वादशी चान्द्रत्वेन विहितकर्कटगताषाढशुक्लद्वादशी चाधिक-मासयुक्ते मिथुनगतपूर्वाषाढं विना कर्कटयुक्तद्वितीयाषाढशुक्लद्वादशी । तथा कर्कटयुक्तश्रावणशुद्धद्वादशीति स्वापकालनिर्णयमाह—षट्स्वधिकृतेत्यादिना । षट्सु मासेषु मेषादियुक्तचैत्रादिषाण्मासादिषु वैशाखादिषु पञ्चसु मध्ये यत्र कुत्रैतस्मिन् मासे यदा यस्मिन् संवत्सरे—दर्शद्वये मेषादिसंक्रान्तौ अमावास्याद्वये सति अधिकता अधिमासः स्यात् । तदा तस्मिन् संवत्सरे कर्कटे शेते शयनं करोति । शयनानन्तरं द्विजादिषु पूर्वाषाढोत्तराषाढ इति द्विजादिमासेषु सन्धि-स्थकतमे सन्धिगतोत्तरमासे सूत्रार्चा कर्तव्या पूर्वमासस्य मलमासत्वादिति भावः ।

दर्शद्वयमतिक्रम्य यदा सङ्क्रमते रविः ।
मलमासः स विज्ञेयः सर्वकर्मबहिष्कृतः ॥ इति वचनात् ।

तथा पवित्रकालनिर्णये चोक्तम् :—

द्वादश्येव सिता रवौ मिथुनगे निद्रां विधत्ते हरे-
स्तां सास्यैव करोति कर्कटरवौ मेषादिषड्राशिषु ।
एकत्राप्यधिमासता यदि हरौ सुप्ते पवित्रक्रिया-
प्रायश्चित्तमथान्यथेदमुदितं श्रीमोहशूरोत्तरे ॥ इति ।

(अनुवर्तते)

(Vol. XVIII-No. 2—31-பக்கத்தின் தொடர்ச்சி)

# 7. அம்புலிப் பருவம்

66. கலைகளி னிரம்பியவ னென்றுலகு புகழவரு
காட்சியுளை யாதலானும்
காயமிசை நின்றுலகி லுளபொருள் விளங்குறக்
காட்டுபணி பூணலானும்
அலைகளி னிறைந்தகட லுடைபூணு நிலமங்கை
யன்புளம் பொங்கிமகிழ்வோடு
அளியுருவ னெனவெண்ணி வரவேற்க வுறுதகுதி
யமையுமொரு பெருமையானும்
நிலைமைபெறு பலகோடி யொளியுரு வணங்கியெதிர்
நிற்கவே தோன்றலானும்
நிகரெனக் கருதவரு தகுதியுளை யெனவுளம்
நினைந்துன்னை யெங்கள் பெருமான்
அலைவுதவி ருளமுடைய வள்ளுவ னழைக்குமா
லம்புலீ யாடவாவே
ஆலவாய்க் கழகமம ரமுதவாய்ப் புலவனொடு
மம்புலீ யாடவாவே. (1)

67. உலகவிரு ளோட்டியுயிர் மனமலர வரியபணி
யுரிமையொடு பூணலானும்
உவமையறு மின்பமய வுருவமொடு மக்கள்மன
முட்புகுந் துறைதலானும்
புலவருக் காரமுத நல்கியவர் புகழுரைகள்
போர்த்துவரு பெருமையானும்
போதபரி பூரண கலாநிதி யெனுந்தகுதி
பொற்பொடு பொருந்தலானும்
நலமுறப் பெறுமதிய னென்றறிஞ ரேத்துமொரு
நன்னிலைமை யெய்தலானும்
ஞாலமிசை நீயுநிக ரென்றருளி னெங்கள்பெரு
நாவலனு முனையழைத்தான்
அலகில்புக ழுடையவவ னருகிலுற மனமகிழ்வி
னம்புலீ யாடவாவே
ஆலவாய்க் கழகமம ரமுதவாய்ப் புலவனொடு
மம்புலீ யாடவாவே. (2)

68. ஆயிரங் கதிர்களுள ஞாயிறம் பகவனரு
ளணியொளியி னொளிபெறுதிநீ
ஆயிரங் கதிர்களொடு முந்நூற்று முப்பதென
வமைகதிர்கொள் தேவனிவனே
மாயிரும் பரவையிடை யமுதமொடு வந்தெழூஉ
மாட்சியுளை நீயுமிவனே
மாயிரும் பரவையுடை நிலமகளின் மனமகிழ
வாக்கினமு தருளும் வள்ளல்
தூயவிண் டலநடவு செங்கோலி னாட்சியுள
தோற்றநீ கொண்டனையெனின்
சோதிவிண் டலமளவு வீறியுயர் கோல்கடவு
தோன்றலிவ னென்றுணருதி
ஆயினுந் தனதருளி னினையிவ னழைத்தலா
னம்புலீ யாடவாவே
ஆலவாய்க் கழகமமர் அமுதவாய்ப் புலவனொடு
மம்புலீ யாடவாவே. (3)

69. அருளினா லெமையாண்ட வள்ளலோ செம்மையா
லவணிபுகழ் நுண்மதியனும்
ஐயநீ யுலகறிய வெள்ளைமதி யென்னவரு
மமைதியுளை நன்கறிதியே
இருளினால் மகிழுமன முடையைநீ யென்பதனை
யெவ்வுலகு நன்குணருமே
இருளையே மாற்றியுயர் மெய்யறிவி னொளிநல்கு
மேற்றமுள னெம்பெருமகன்
தெருளினா லுலகாண்ட செம்மலிவ னென்பது
தெரிந்துநின் குறைகள் தேர்ந்து
தெளிவிலாத் தீயசெயல் செய்துசிற் றினநண்பு
செய்தநீ நன்மையெய்தும்
மருளிலா நினைவுடைய னென்னின்மகிழ் வுடனாட
வருகவம் புலிவருகவே
வள்ளுவக் குழவியொடுமுள்ளுவப் புறவாட
வருகவம் புலிவருகவே. (4)

70. தேவரமு தயிலுதற் கமையலாப் பாம்பது
சினத்திற் கிளர்ந்துபகுவாய்
சேரநினை யுள்ளிட விழுங்கவரு பகைகண்டு
சித்தமயர் சிறுமையுளையே

யாவரு மடைக்கலந் தரவல்ல ரல்லரோ
வென்னவெங் கெங்குநோக்கி
யிமையவர்த முலகத்தின்முகிலிடை மறைந்துநீ
யீறிலா வல்லலுறுவாய்
தாவறு புகழ்ப்பிரம தேவனை நிகர்த்தவெம்
தமிழ்வள்ளல் தாண்மலரிலே
சரண்புகுந் தனையென்னி னெவ்வகைய பீழையுந்
தான்போக்கி யருள்புரியுமே
மாவிநய முடனெங்கள் தலைவனொடு விளையாட
வருகவம் புலிவருகவே
வள்ளுவப் புலவனொடு முள்ளுவப் புறவாட
வருகவம் புலிவருகவே. (5)

71. வளமைபெறு சங்கத்து வீற்றிருந் துயர்கூல
வாணிகன் சாத்தனுர்க்கு
வருதலைக் குத்தெனுங் கொடியபிணி தீர்த்துயிர்
மருந்தருள வந்தவள்ளல்
களவுநெறி சென்றநின் குறைகளை மறந்துகை
காட்டியரு ளாலழைத்தால்
கயநோயின் மிகுதுயர்ப் படுநினது வரலாறு
காசினியும் வானுமறியும்
அளவிறந் துயர்கருணை யந்தண்மை பூண்டருளு
அண்ணலரு கேயடைந்தால்
அரியபல நலமுநீ யெய்தலாம் குறைதவிர்ந்
தாளாகி யுயலுமாகும்
வளவர்வழு தியர்பொறையர் பணிபுலவன் விளையாட
வருகவம் புலிவருகவே
வள்ளுவப் புலவனொடு முள்ளுவப் புறவாட
வருகவம் புலிவருகவே. (6)

72. கவியே கமகன் வாதியொடு
கனியும் வாக்கி யெனப்புகலும்
கலைமாச் செல்வர் தலையாகக்
கரங்கள் கூப்பிக் கழல்பணியும்
புவியே விண்ணே பரந்தபுகழ்ப்
புலவர் பெருமா னழைக்கின்ருன்
பொலிவில் மறுவாற் சிறுமைகொளும்
புரையோய் நிறைவற் றுடறேய்ந்து

செவியே யில்லாச் சிற்றரவின்
செயலுக் கஞ்சிப் புறங்கொடுக்கும்
திங்கட் கொழுந்தே மறுவில்லாச்
செவிசெஞ் செல்வன் திருமுன்பு
புவியே யிறங்கி விளையாடப்
போத வருவா யம்புலியே
பொய்யா மொழிசொல் புலவனொடும்
பொருந்த வருவா யம்புலியே. (7)

73. விழியி னெஞ்சில் நெருப்பிடையே
வியன்பாற் கடலில் விதிபடைப்பின்
விரிந்த பிறவி யைந்துடையாய்
வெண்மைக் கதிர்கொள் கலாநிதியே
இழியும் பிறவித் துயரமுணர்ந்
தெடுத்த பிறப்பே யொன்றுடையான்
இனியெப் பொழுதும் பிறப்பறியா
வேற்ற முடைய வெங்கள்பிரான்
வழியுங் கருணை விழிப்பெருக்கான்
வருகென் றுனையு மதித்தழைத்தான்
மதிமான் உருவா யெனினீயே
மனத்திற் கடுக விரைந்தோடிப்
பொழியு மமுதக் கடலவன்முன்
போத வருவா யம்புலியே
பொய்யா மொழிசொல் புலவனொடும்
பொருந்த வருவா யம்புலியே. (8)

74. நஞ்சினை யூட்டிய வமுத நிகர்ப்புறு
நயன் மடந்தையரான்
நாளு மிகழ்ச்சிகள் பெற்றுனை நின்செயல்
நானில நன்கறியும்
மஞ்சினை வென்ற கொடைக்குண மேவிய
வாய்மொழி நாவலவா
மாசறு நான்முக தேவ னெனப்புகழ்
மாதவ முனிநினையே
சஞ்சல நீங்கிய நன்னல மெய்துறு
தண்ணரு ளான்மதியே
தன்கர மென்மலர் காட்டி யழைத்தது
தவமுறு பேறறிவாய்

வஞ்சனை யின்றிய நெஞ்சனோ டாடுற
வாவம் புலிவாவே
வாயுறை வாழ்த்தருள் வாயின னருகுற
வாவம் புலிவாவே. (9)

75. இரவொரு பணியென வுலக மியற்றிய
விறைவன் விதித்திடுமேல்
இறுதியை யுறுகென வவனை யொறுத்திடு
மியல்மொழி நாவலவன்
இரவுறு பணியினை யெனநினை யறிவுறின்
யாது விளைந்திடுமோ
எழில்வளர் குளிர்கதி ரமுதுகு மிளமதி
யிதனை மனங்கொளுவாய்
பரவுறு குணமலை யமர்பவர் சினமுறு
பரிசினை யணுகுவரேற்
பழிபடு மவரொடு கணமெனு நிலையுறு
பதநில வலரறிவாய்
வரவறு துணிவொடு நிலமிசை மருவுற
வாவம் புலிவாவே
வாயுறை வாழ்த்தருள் வாயின னருகுற
வாவம் புலிவாவே. (10)

# 8. சிற்றிற் பருவம்

76. மறவர் குலத்தின் செருக்கதனை
வகுத்து விளக்குந் திருவுளத்தான்
வயஞ்சா லென்னை முன்னீவர்
வருதல் தவிர்க தெவ்விர்காள்
இறைவ னவர்முன் நின்றவரே
இம்ப ருலகிற் கன்னின்றூர்
ஏறி விண்ணி னிலைபெற்றூர்
எனவே தெளிவா யருள்புலவ
சுறவு நீந்தும் பெருங்கடலிற்
சொரியும் சங்கின் முத்தினொடு
தூவெண் மணலைக் கலந்தளியேம்
துளிக்கும் வண்ட லாட்டயரத்

திறவி தமைப்பான் முயல்கின்ற
சிறியேம் சிற்றில் சிதையேலே
திருவள் ளுவனே திருவடியாற்
சிறியேம் சிற்றில் சிதையேலே. (1)

77. கான முயலை யெய்துகொலும்
கணையிற் களிற்றின் மேற்போக்கிக்
கருதும் கருத்து நிறைவேருக்
கதிர்வே லேந்தல் பெருமையென
வான முயரும் புகழ்பொருந்து
மன்னர் படையின் மறவருக்கு
வாய்த்தற் குரிய மறம்விளக்கும்
வாய்மை தழைத்த தவக்கொழுந்தே
மான முடைய சமர்மறவர்
வாளா லுயிரை யிழவாமை
வழுவென் றுணருந் தமிழ்க்குடியின்
வாழ்வு புகன்ற திருவாய
தேனின் மொழியா லிரக்கின்றேம்
சிறியேம் சிற்றில் சிதையேலே
திருவள் ளுவனே திருவடியாற்
சிறியேம் சிற்றில் சிதையேலே. (2)

78. கைவேல் களிற்றின் சிரத்தழுத்திக்
கணையும் வில்லும் வாளுமின்றிக்
கருந்தோ ளொன்றே துணையாகக்
களத்து மறவ ரிடைவருவோன்
மெய்வே லுரத்தே பாய்ந்ததனை
விழித்துக் கையாற் பறித்தெடுத்து
விரவா ரிடையே துணிவிஞெடு
மிகையா னகைத்துப் பாயுமெனப்
பொய்யே யறியாத் திருவாயாற்
புகழ்ந்து தமிழ மறவரியல்
புவியோ ரறிய விளக்கவந்த
புகழ்சால் புலமைப் பெருமானே
செய்வே மடியேஞ் சிறியமனை
சிறியேம் சிற்றில் சிதையேலே
திருவள் ளுவனே திருவடியாற்
சிறியேஞ் சிற்றில் சிதையேலே. (3)

79. புரந்து நெடுநாள் படைபயிற்றிப்
பொருவெங் களத்தின் விடுமன்னர்
புன்கண் பயில்கண் ணீர்மல்கப்
புகழி னுடம்பு பெறுஞ்செல்வம்
இரந்து கொள்ளத் தகுவதென
இயல்செஞ் சோற்றுக் கடன்கழிக்கும்
இசையான் விளங்கு மறவர்செயல்
எடுத்துப் பேசுங் கனிவாய
சுரந்து சுரரும் பெறலரிய
சுவைசா லமுதம் பொழிந்தருளும்
தூய முனிவ வாசுகியைத்
துணையா யடைந்த தவமணியே
அரந்தின் வேல்போல் விழிவாட
அடியேஞ் சிற்றில் அழியேலே
அறஞ்சொல் பொய்யா மொழிப்புலவ
அடியேஞ் சிற்றில் அழியேலே. (4)

80. புரைதீர் நட்பின் திறமறிவார்
புணர்ச்சி பழக வேண்டாவாம்
புகுந்த வுள்ளத் துணர்ச்சியினுற்
பொருந்து மனமே பெருமைதரும்
கரையா லடங்கா மகிழ்ச்சியினுற்
கலந்து நகுதற் பொருட்டன்று
கடமை பிறழ்ந்த மிகுதியிடைக்
கடிந்து மேற்சென் றிடித்தற்கே
உரைசா னட்பை யுறல்வேண்டும்
உண்மை விளக்க மிதுவெனவே
உலக மனைத்து மறிந்துணர
ஓதப் பிறந்த வொருபுலமை
அரசே வருந்தி யமைக்கின்றேம்
அடியேம் சிற்றில் அழியேலே
அறஞ்சொல் பொய்யா மொழிப்புலவ
அடியேஞ் சிற்றில் அழியேலே. (5)

81. உடுக்கை யிழந்தான் கைபோல
ஓடி யாங்கே விரைந்தடையும்
உள்ள முடையார் உயிர்கொடுக்கும்
உரிமை பூணும் திறமுடையார்

இடுக்கண் களையு நலமுடையார்
    இனிய நட்பே மெய்நட்பாம்
எதிரே முகத்தின் முன்நகைத்துள்
    இயங்கு மினிய நகையில்லார்
அடுக்கு நட்பு நட்பன்றும்
    அகத்தின் நகவே யமைநண்பர்
அடையப் பெறுதல் பெரும்பேறென்
    றறிய வுரைத்த குணக்குன்றே
அடுக்கல் முனிவன் தமிழ்பயின்றாய்
    அடியேஞ் சிற்றி லழியேலே
அறஞ்சொல் பொய்யா மொழிப்புலவ
    அடியேஞ் சிற்றி லழியேலே. (6)

82. ஒருமையு ளாமை யடங்குத லொப்ப
    வொடுங்கும் தவநெறியே
உலகினை வெல்லுந் திறமுள தென்னும்
    உண்மையை யோதியவ
பெருமையொ டின்பம் விளைகில வெனினும்
    பேதையர் கேண்மையினே
பிரிவினி லெய்தும் பீழைக ளின்மை
    பெரிதினி தெனமொழிவாய்
அருமையி தென்னும் தளர்வி னகன்றே
    அயர்வற முயல்வதனுல்
அடைவது திண்ணம் பெருமை முயற்சியி
    னுகுவ தெனுமறிவ
திருவடி நோவச் சிறியேஞ் சிற்றில்
    சிதையா தருள்வாயே
திருமறை பாடும் புலவா சிற்றில்
    சிதையா தருள்வாயே. (7)

83. தேவரி னிகர்வர் கயவரு மனையார்
    சித்த நினைத்தனவே
செய்ய விழைந்தனர் வரும்வினை வோர்கிலர்
    சேர்வன சேர்கெனவே
மேவன செய்தன ரொழுகுற மனமுள
    மிகுதி படைத்திடலான்
வேறுள பிறர்புகல் மறைபிறர் செவியுற
    விட்டு விளம்புதலான்

தாவுறு பறையினை மானுவ ரவரெனச்
சாற்றிய மெய்ம்மொழியாய்
தாளமு மணிகளும் வைத்து மகிழ்ச்சி
தழைப்புறும் வண்டலினேம்
சேவடி நோவச் சிறியேம் சிற்றில்
சிதையா தருள்வாயே
திருமறை பாடும் புலவா சிற்றில்
சிதையா தருள்வாயே. (8)

84. குன்ற நிகர்ப்பவர் குன்ற மதித்திடிற்
குடியொடு நின்றவரும்
குடிகெட மாய்குவ துறுதி யெனத்தெளி
கொள்கை விளக்கினையே
நின்ற நினக்கு நிகர்ப்புற வல்லவர்
நிலமிசை வானினிடை
நீயு மறிந்தனை யொருவரு மிலரெனல்
நிறைமொழி நாவலனே
கன்று மனத்தொடி யாரின தருள்பொழி
கண்ணிணை மலர்மலரும்
கமல முகத்தின தடியவ ரென்றொரு
கட்டுரை சொற்றிடுவேம்
சென்று நடந்தருள் சிறியேம் சிற்றில்
சிதையா தருள்வாயே
திருமறை பாடும் புலவா சிற்றில்
சிதையா தருள்வாயே. (9)

85. வெம்மை விளங்கிய கனலி சுடப்படின்
விளிவற வுயவுளதே
விரிகட லிடையினில் வங்க மிழந்தவர்
மீடலு முளதன்றே
தம்மை யறிந்துள சான்றவர் நெஞ்சு
சலிப்புறு பிழைபுரிவார்
தம்மொடு தங்குடி தன்னையும் நரகிடை
தள்ளுவ ரெனமொழிவாய்
எம்மை யறிந்தனை நின்னை யறிந்துளெ
எளியரி னெளியமியாம்
இணையறு பெருமையை நினதருள் நாடுறு
மியலின திளகழலாஞ்

செம்மலர் நோவச் சிறியேம் சிற்றில்
சிதையா தருள்வாயே
திருமறை பாடும் புலவா சிற்றில்
சிதையா தருள்வாயே. (10)

# 9. சிறுபறைப் பருவம்

86. அறிவுதெளி வெய்திலாப் பேதைநல் வினையா
ளளவற்ற செல்வமடையின்
அகடார வேதிலர்க ளுண்டுதேக் கிடவுறவி
னவர்தமர்கள் பசியினினைவார்
நெறிமருளு பித்துடைய வொருவன்மது பானமு
நிரம்புற்ற நிலைமைதனையே
நிகராகு மறிவிலாப் பேதையொரு பொருள்பெற்ற
நிலையென் றுணர்த்துமறிவ
வெறிமலியு மொருபேதை வினைபுரிய முன்வந்து
மெய்ம்மையு மிழந்துமேலும்
விரிபொய்ம்மை சூழலாற் புனைபூணு மெனுமுண்மை
வேதமென வோதுமுனிவ
செறிவுதெளி வினிமைமலி மழலைபயல் குழவியே
சிறுபறை முழக்கியருளே
செழியர்தமிழ் பொதுமறையை யடையவருள் கிழவனே
சிறுபறை முழக்கியருளே. (1)

87. வினையின்வலி மதியாது தாழாது முலையாதும்
விழைவொடு முயற்சியுருவன்
மிக்கதிற லூழினையு முப்பக்க மாக்குவது
மெய்யென விசைத்தபுலவ
நினைவினொடு மேற்கொளு முயற்சிதிரு வினையாக்கும்
நெஞ்சுற முயற்றின்மையே
நிறைதுயர மடையவரும் வறுமையினை நல்குமென
நேயமோ டுணர்த்துமறிவ
தனைநிகர்வ தொன்றிலாத் தெய்வத்தி னாகாத
தன்மையுள நன்மைதானும்
தன்முயற் சிக்குரிய மெய்வருத் தக்கூலி
தருமென்று சொற்றசெல்வ

திணையளவு நன்றியையு மறவாமை தெளிவித்த
சிறுபறை முழக்கியருளே
செழியர்தமிழ் பொதுமறையை யடையவருள் கிழவனே
சிறுபறை முழக்கியருளே. (2)

88. நண்பர்களை யாய்ந்தாய்ந்து கொள்ளுநெறி முறைமையுற
நவிலுதிரு வுள்ளமுடனே
நற்குடியும் வருகுடியு மியல்பினவர் சேரினமு
நன்கிலாக் குற்றங்களும்
எண்பெருமை பிறவுளவு மோர்ந்தபினர் நட்கவென
வினிதுணர்த் தியபுலவனே
ஏற்றமுள குடிவந்து பழிநாணு பவனட்பின்
எய்தவரு நன்மைபலவே
பண்புடைய நண்பர்குறை கண்டளவி னெஞ்சுநோம்
பரிசினு மிடித்துநன்மை
பயிலவே போதிக்கு மனமுடைய ரெனவோது
மளகிலா வாய்மையுடையாய்
திண்படைஞர் சூழவரு தமிழரசர் செல்வமே
சிறுபறை முழக்கியருளே
செழியர்தமிழ் பொதுமறையை யடையவருள் கிழவனே
சிறுபறை முழக்கியருளே. (3)

89. ஒருமைப் பிறப்பிற் பெருங்கல்வி
ஒருவற் கெழுமைப் பிறப்பினிலும்
உரிய வேமாப் பருளுமென
வோதத் துணிந்த வொருபுலவ
பெருமைக் குரிய கல்வியினைப்
பேணிக் கல்லா வொருவனுந்தான்
பெரியார் சொல்லு மறநுட்பம்
பிறவிப் பயனுக் கேட்குமெனின்
அருமைப் பேற்றைக் கேள்வியினுல்
அடையப் பெறுவா னெற்கத்தின்
அதுவே யூற்றுந் துணையாகும்
அவனுக் கெனவே யருளுபவ
திருவைப் பணிகொள் தமிழ்நாடா
சிறுபறை கொட்டி முழக்குகவே
திருவள் ளுவனு நான்முகனே
சிறுபறை கொட்டி முழக்குகவே. (4)

90. அகத்தின் பொருளைத் தமிழ்மக்கள்
அறிந்த வண்ண மாய்ந்துணர்ந்தே
அமைய விளக்கும் கருத்துடனே
ஐயைந் தாகும் அதிகாரம்
இகத்தின் நலமா மின்பநெறி
யியைபு பொருத்தி யிழைத்தனையே
இயனூல் தருதொல் காப்பியரும்
இறைய னாரும் இலக்கியமென்
றகத்தின் மகிழ்ந்து நீபுனைந்த
வரிய பெருமைக் குறள்களையே
அமுதத் தமிழ மொழிகொள்ள
ஆணை விதித்த வண்ணமெனச்
செகத்தின் மலிந்த புகழுடையாய்
சிறுபறை கொட்டி முழக்குகவே
திருவள் ளுவனு நான்முகனே
சிறுபறை கொட்டி முழக்குகவே (5)

91. நனவி னிடையே நான்காண
நல்கா தென்னை மறந்திருந்து
நாடு தோறும் பொருள்தேட
நடந்த நயமில் காதலரைக்
களவி னிடையே யிரவெல்லாம்
கண்டு கண்டு மகிழ்வதனால்
கழியு நீர்த்தா மென்னுயிரும்
கழியா திருக்கு மெனத்தலைவி
தனது நிலைமை யவன்வாக்கால்
தமிழ ரொழுக்க முறைதழுவத்
தகுதி விளங்கத் தருபுலவ
தமிழ மகளின் தவப்பேறே
தினமு முலகங் குறள்பயிலச்
சிறுபறை கொட்டி முழக்குகவே
திருவள் ளுவனு நான்முகனே
சிறுபறை கொட்டி முழக்குகவே. (6)

92. செல்லல் தவிரு நினைவுளதேற்
செவியி னெனக்கே யுரைத்தருள்க
செல்வந் திரட்டுங் கருத்தோடு
சென்று மீளும் செயல்விளக்க

வல்லை வருவல் மயங்காதி
மாதே யென்னு மவ்வுரையை
வருங்கால் வாழ வல்லவர்பால்
வழங்கல் தகுமென் றுரைக்குமொரு
நல்ல தலைவி பிரிவாற்கு
நயத்தை விளக்கு நலமுடையாய்
நன்றே தரினு நடுவிகந்து
நணுகு மாக்க மொழிகவெனச்
செல்லு மொழியா லருள்புலவ
சிறுபறை கொட்டி முழக்குகவே
திருவள் ளுவனும் நான்முகனே
சிறுபறை கொட்டி முழக்குகவே. (7)

93. திணையின தளவுக் கிணையில தாகிய
சிறுபுன் னீரதுதான்
திவமுறு செங்கதிர் படர்வுறு காலை
தெளிந்து விளங்குறவே
பனையின தளவும் காட்டி விளக்குறு
பண்பென நின்குறளில்
பழமறை யோதிய பொருள்க ளனைத்தும்
பயில வமைத்தனையே
தனைநிகர் பொருளொன் றின்றென நின்று
தனித்துறு மெய்ப்பொருளைச்
சமரச நெறியக மனைவரு முணர்வுறு
தத்துவம் வைத்தனையே
முனைவரு மறிதற் கரியன வறிவ
முழக்குக சிறுபறையே
முப்பால் தமிழர்க் கருளிய குழக
முழக்குக சிறுபறையே. (8)

94. நினைப்பவர் போன்று நினைக்கில ரென்பது
நெஞ்சம் விளக்கியதே
நேய மிகுத்தவர் போலுரை பொய்யுற
நீங்கிய காதலர்தாம்
சினைப்பது போன்று புறப்படுதும்மல்
சிறைக்கு ளடங்குறவே
சென்றனர் மீளுவ தென்றென நாடுறு
செயலுள தலைவியுளம்

தனைத்தமிழ் நூலவர் கருதிய வாறு
தழைப்புற வோதியவ
தலைவ ருளத்தினின் யாமு முளேமவர்
தாமெ முளத்துமுளார்
முனைப்பது காத லெனச்சொலு நாவ
முழக்குக சிறுபறையே
முப்பால் தமிழர்க் கருளிய குழக
முழக்குக சிறுபறையே. (9)

95. விருந்து புறத்துள தாகிய நிலையினில்
வேட்கு முணர்ச்சி யொடும்
மிக்க கடும்பசி யாலுயிர் வீடினும்
வெந்துயர் மாற்றவரும்
மருந்து நிகர்ப்புற வந்துள வுணவையும்
மனமுற வுண்பதையே
வாழ்வுறு நெறிகளை நள்ள ரறிந்தவர்
மாண்புறு மெனநினையார்
